समास—मरुत्प्रयुक्ताः=मरुता प्रयुक्ताः (तत्पुरुष)। बाललताः=बालाश्च ताः लताः (कर्मधारय)। आचारलाजैः=आचारार्थं लाजैः (तत्पुरुष मध्यमपदलोपी समास)। पौरकन्याः=पौराश्च ताः कन्याः (कर्मधारय) ॥१०॥

व्याकरण—प्रयुक्त=प्र+युज्+क्त। अर्च्यम्=ऋच्+यत्। अभिवर्तमानम्=अभि+वृत्+शानच्। प्रसून=प्र+सू+क्त। आचार=आ+चर्+घञ्। पौर=पुर+अण्। ॥ १० ॥

विशेषः—प्रस्तुत श्लोक में "मरुत्सखाभम्" में वाचक लुप्तोपमा है। क्यों कि राजा उपमेय, अग्नि उपमान, और आभा साधारण धर्म है। वाचक शब्द न होने के कारण वाचकलुप्तोपमा है। साथ ही नीचे वाले पद में पूर्णोपमा है। यहाँ पौरकन्या उपमान, बाललता उपमेय, अवाकिरन् साधारण धर्म और इव उपमा का वाचक है।प्रकृति के विभिन्न विषयों द्वारा राजा दिलीप की महत्ता का प्रकाशन किया गया है ॥ १० ॥

प्रशंग—सेवानिरत तेजस्वी राजा दिलीप को वन की हरिणियां भी उनकी दयालुतासे प्रभावित होकर उन्हें देख रही हैं—

धनुर्भृतोऽप्यस्य दयार्द्रभावमाख्यातमन्तःकरणैर्विशङ्कैः।
विलोकयन्त्यो वपुरापुरक्ष्णां प्रकामविस्तारफलं हरिण्यः ॥ ११ ॥

अन्वयः—धनुर्भृतः अपि अस्य विशंकैः अन्तःकरणैः दयार्द्रभावम् आख्यातम् वपु विलोकन्त्यः हरिण्यः अक्ष्णाम् प्रकामविस्तारफलं आपुः ॥ ११ ॥

संस्कृतटीका—धनुर्भृतः अपि=धनुर्धारिणः अपि, अस्य=राज्ञः दिलीपस्य, विशंकैः=निःशंकैः, अन्तःकरणैः=अन्तरिन्द्रियैः, दयार्द्रभावम्=करुणार्द्रभावम्। आख्यातं=प्रकटीकृतम्। वपुः=शरीरम्। विलोकयन्त्यः=पश्यन्त्यः। हरिण्यः=मृग्यः। अक्ष्णाम्=नेत्राणाम्। प्रकामविस्तारफलम्=प्रकामविशालतालाभम्। आपुः=अलभन् ॥११॥

संस्कृत भावार्थ—राजा दिलीपः धनुर्धारी आसीत् परन्तु हरिण्यः निःशंकैः हृदयैः दयालुतायुक्तं तस्य वपुः प्रकामं विलोकयन्त्यः स्वनेत्राणाम् विस्तारस्य फलं अलभन्। तथा मृग्यः धनुर्भृतं तं विलोक्य पलायनं न कुर्वन्ति, किन्तु तम् विशेषरूपेण विलोकयन्ति ॥ ११ ॥

शब्दार्थः—धनुर्भृतः=धनुष धारण करने वाले। विशंकैः=शंका रहित (निःशंक)। अन्तःकरणैः= हृदय से। दयार्द्रभावम्=दया के द्वारा आर्द्र भाव को। आख्यातम्=कहा गया। वपुः=शरीर को। विलोकयन्त्यः= देखती हुई। अक्ष्णाम्=नेत्रों के। प्रकामविस्तारफलम्=अत्यन्त विशालता के फल को। आपुः= प्राप्त किया॥ ११॥

हिन्दी अर्थ—धनुष को धारण करने वाले भी राजा दिलीप के दया के भाव का प्रकट करने वाले शरीर को भय से रहित हृदयों से देखती हुई हिरणियों ने अपने नेत्रों के अत्यधिक विस्तृत होने का लाभ उठाया॥ ११॥

समास—धनुर्भृतः=धनुर्बिभर्तीति धनुभृत् तस्य (उपपदसमास)। दयार्द्रभावम्=दयया आर्द्रस्य भावः यस्य स तम् (बहुव्रीहि)। प्रकाम-विस्तारफलम्=प्रकामस्य विस्तारस्य फलम् (षष्ठीतत्पुरुष)। विशंकैः=विगता शंका येषाम्ते तैः (बहुव्रीहि)

व्याकरण—भृतः=भृ+क्विप्। भावम्=भू+घञ्। आख्यातम्= आ+चक्ष्+क्त। अन्तःकरण=अन्तः+कृ+ल्युट्। विलोकयन्त्यः=वि+ लोक्+शतृ+ङीप्। आपुः=आप्+लिट् प्र० पु० बहुवचन।११।

विशेष—यहाँ राजा की परमोत्कृष्ट विशेषता व्यक्त की गई है कि धनुष धारण करने वाले से यद्यपि हरिणियाँ डरकर दूर भागती हैं परन्तु उसके दयाभाव से हरिणियों को विश्वास है कि यह हमें मारेगा नहीं अतः बहुत देर तक उसे देखती रहती है। राजा की उदारता एव वन्य जन्तुओं के प्रति प्रेम का प्रदर्शन है।

प्रस्तुत श्लोक में अनुप्रास अलंकार तो है ही साथ ही विरोधाभास भी है। क्योंकि भय को उत्पन्न करने वाले धनुष को देखकर भी हरिणियों के मन भय रहित हैं। परन्तु राजा के दयार्द्र प्रभाव के कारण उनका भय जाता रहता है॥११॥

प्रसंग—दिलीप को आता हुआ देखकर वृक्ष जय-जयकार करते हुये लताओं द्वारा उन पर फूल बरसाने लगे तथा अपने शब्दों द्वारा राजा का यशोगान करने लगे—

स कीचकैर्मारुतपूर्णरन्ध्रैः कूजद्भिरापादितवंशकृत्यम्।
शुश्राव कुञ्जेषु यशः स्वमुच्चैरुद्गीयमानं वनदेवताभिः॥१२॥

अन्वयः—स मारुतपूर्णरन्ध्रैः कूजद्भिः कीचकैः आपादितवंशकृत्यम् कुञ्जेषु वनदेवताभिः उच्चैः उद्गीयमानम् स्वम् यशः शुश्राव॥१२॥

संस्कृत टीका—सः=राजा दिलीपः । मारुतपूर्णरन्ध्रैः=वायुपूरितछिद्रैः कूजद्भिः=शब्दायमानैः । कीचकैः=वेणुभिः । आपादितवंशकृत्यम्=सम्पादितवेणुवाद्यकार्यम् । कुञ्जेषु=लतागृहेषु । वनदेवताभिः=वनदेवीभिः । उच्चैः उच्चस्वरेण । उद्गीयमानम्=गायनंक्रियमाणम् । स्वम्=आत्मीयम् । यशः=कीर्तिम् । शुश्राव=अशृणोत् ॥१२॥

संस्कृत भावार्थ—गोसेवापरायणः राजा दिलीपः वने विचरन् आसीत् तदा वायुपूरितछिद्रैः शब्दं कुर्वद्भिः वेणुविशेषैः, वनदेवताभिः गायमानम् स्वकीयं यशः अशृणोत् । गायने यत् वंशीवाद्यस्यावश्यकतासीत्, तत् स्वनद्भिः कीचकैः पूर्णं कृतम् ॥१२॥

शब्दार्थ—मारुतपूर्णरन्ध्रैः=वायु से पूर्ण छिद्रों वाले । कूजद्भिः=शब्द करते हुए । कीचकैः=बाँसों से । आपादितवंशकृत्यम्=जिससे बाँसुरी बजने का कार्य पूर्ण किया गया । कुञ्जेषु=लतागृहों में । वनदेवताभिः=वन देवताओं के द्वारा । उच्चैः=ऊँचे स्वर से । उद्गीयमानम्=गाये जाते हुए । स्वम् यशः =अपनी कीर्ति को । शुश्राव=सुना ॥१२॥

हिन्दी अर्थ—राजा दिलीप ने वायु से भरे हुये छिद्रों वाले अतः शब्द करते हुए बांसों द्वारा वांसुरी का कार्य पूर्ण करने वाले वनदेवियों द्वारा कुञ्जों में ऊँचे स्वर से गाये जाने वाले अपने यश को सुना ॥१२॥

समास—मारुतपूर्णरन्ध्रैः=मारुतेन पूर्णानि रन्ध्राणि येषाम् ते तैः (बहुव्रीहि) आपादितवंशकृत्यम्=आपादितं वंशस्य कृत्यं यस्मिन् तत् (तत्पुरुष, बहुव्रीहि) वनदेवताभिः=वनस्य देवताभिः (षष्ठी तत्पुरुष) ।

व्याकरण—कीचकैः=चीक्+वुञ्+अक् (च और क काविपर्यय हुआ है) कूजद्=कूज्+शतृ । उद्गीयमानम्=उद्+गै+यक्+शानच् । शुश्राव=श्रु+लिट् प्र० पु० ए० व० ॥१२॥

विशेष—तात्पर्य है कि वन देवियाँ राजा का यशोगान कर रही थीं । उस गायनकाल में कीचक नाम के विशेष प्रकार के बांस जो वायु के भर जाने के कारण शब्द कर रहे थे मानो वही वन देवताओं की बाँसुरी थे । इस प्रकार राजा की महत्ता स्थापित की गई है कि प्रकृति भी दिलीप के सुकृत्यों से प्रभावित हो गई थी ॥१२॥

जगण	तगण	जगण	गु. गु.		
। ऽ ।	ऽ ऽ ।	। ऽ ।	ऽ ऽ		
अ थ प्र	जा ना म	धि पः प्र	भा ते	=	(उपेन्द्रवज्रा)
जगण	तगण	जगण	गु. गु.		
ऽ ऽ ।	ऽ ऽ ।	। ऽ ।	ऽ ऽ		
जा या प्र	ति ग्रा हि	त ग न्ध	माल्याम्	=	(इन्द्रवज्रा)
जगण	तगण	जगण	गु. गु.		
। ऽ ।	ऽ ऽ ।	। ऽ ऽ	ऽ ऽ		
व ना य	पी त प्र	ति ब द्ध	व त्साम्	=	(उपेन्द्रवज्रा)
जगण	तगण	जगण	गु. गु.		
। ऽ ।	ऽ ऽ ।	। ऽ ।	ऽ ऽ		
य शो ध	नो धे नु	मृ षे मुं	मो च	=	(उपेन्द्रवज्रा)

समास--यशोधनः=यश एव धनं यस्य सः (बहुव्रीहिसमास)। जायाप्रतिग्राहितगन्धमाल्याम्=जायया प्रतिग्राहिते गन्धमाल्ये यया सा ताम् (बहुव्रीहि०)। पीतप्रतिबद्धवत्साम्=पूर्वं पीतः पश्चात् प्रतिबद्धो वत्सो यस्याः सा ताम् (बहुव्रीहि०)।

व्याकरण—प्रजानाम्=प्र+जन्+ड+टाप्=प्रजा, षष्ठीबहुवचन में प्रजानाम्। अधिपः=अधि+पा+क। प्रतिग्राहित=प्रति+ग्रह्+णिच्+क्त। पीतः—पा+क्त, प्रतिबद्धः=प्रति+बन्ध्+क्त। मुमोच= मुच् धातु लिट् लकार प्रथम पुरुष एकवचन।

'वनाय' में "क्रियार्थोपपदस्य च कर्मणि स्थानिनः" सूत्र से चतुर्थी विभक्ति हुई है। जहाँ तुमुन् प्रत्ययान्त धातु का भाव या अर्थ छिपा रहता है उसके कर्म में चतुर्थी हो जाती है। वनं गन्तुं मुमोच=वनाय मुमोच ॥१॥

प्रसङ्ग—राजा दिलीप नन्दिनी को जब जंगल में चराने के लिए ले जा रहे थे तो उनके साथ सुदक्षिणा भी उनके पीछे-पीछे चली—

तस्याः खुरन्यासपवित्रपांसुमपांसुलानां धुरि कीर्त्तनीया।
मार्गं मनुष्येश्वरधर्मपत्नी श्रुतेरिवार्थं स्मृतिरन्वगच्छत् ॥२॥

अन्वय—अपांसुलानाम् धुरि कीर्त्तनीया मनुष्येश्वरधर्मपत्नी खुरन्यासपवित्रपांसुम् तस्याः मार्गम् स्मृतिः श्रुतेः अर्थम् इव अन्वगच्छत् ॥२॥

संस्कृत टीका—अपांसुलानाम्=पतिव्रतानाम्, धुरि=अग्रे, कीर्त्तनीया=प्रशंसनीया, मनुष्येश्वरधर्मपत्नी=महाराजदिलीपस्य धर्मपत्नी सुदक्षिणा, खुरन्यासपवित्रपांसुम्=खुरनिक्षेपपवित्रधूलिम्, तस्याः=नन्दिन्याः, मार्गम्=पन्थानम्, स्मृतिः=स्मृतिशास्त्रम्, श्रुतेः=वेदस्य, अर्थमिव, अन्वगच्छत्=अनुसृतवती ॥२॥

संस्कृत भावार्थः—समस्तपतिव्रतास्त्रीमण्डले अग्रे गणनीया राजमहिषी सुदक्षिणा तस्याः नन्दिन्याः खुरनिक्षेपेण पवित्रधूलियुक्तं मार्गं एवमनुसृतवती यथा मन्वादिप्रणीतं शास्त्रम् वेदार्थनुसरति ॥२॥

शब्दार्थ=अपांसुलानाम्=पतिव्रता स्त्रियों में। अग्रे=आगे। कीर्तनीया=परिगणनीया। मनुष्येश्वरधर्मपत्नी=दिलीप की पत्नी रानी सुदक्षिणा। खुरन्यासपवित्रपांसुम्=खुर रखने से पवित्र धूलियुक्त। स्मृति=धर्मशास्त्र। श्रुतेः=वेद के। अन्वगच्छत्=पीछे-पीछे चली ॥२॥

हिन्दी अर्थ—पतिव्रताओं में अग्रगण्य राजा दिलीप की धर्मपत्नी सुदक्षिणा ने नन्दिनी के खुरों के निक्षेप से उठने वाली धूलियों से पवित्र मार्ग का ऐसे अनुसरण किया, जैसे स्मृतियां वेदों का अनुसरण करती हैं ॥२॥

समास—अपांसुलानाम्=न पाँसुला अपांसुलाः तासाम् (नञ् तत्पुरुष) खुरन्यासपवित्रपांसुम्=खुराणां न्यासेन पवित्राः पांसवः यस्य तत् (बहुव्रीहिसमास)। मनुष्येश्वरधर्मपत्नी=मनुष्याणां ईश्वरस्य धर्मपत्नी (षष्ठीतत्पुरुष) ॥२॥

व्याकरण—पांसुलानां=पासु+लच्+टाप्। श्रुति=श्रु+क्तिन्। स्मृति=स्मृ+क्तिन्। अन्वगच्छत्=अनु+गम्+लङ् लकार प्रथम पुरुष एक वचन ॥२॥

विशेष :—प्रस्तुत श्लोक में 'उपमा' अलंकार है यहाँ नन्दिनी गाय उपमेय और श्रुति उपमान, मार्ग उपमेय और अर्थ उपमान, रानी सुदक्षिणा

उपमेय और स्मृति उपमान है। 'अनुगमन करना' साधारण धर्म और 'इव' उपमा वाचक शब्द है। इस प्रकार उपमा के चारों अंग होने से पूर्णोपमा है। इस श्लोक में विरोधाभास अलंकार भी है। सुदक्षिणा पाँसुयुक्त मार्ग का अनुसरण करती हुई भी अपांसु है। यहाँ मार्ग पांसुयुक्त है जिसका वह अनुसरण कर रही है परन्तु वह अपांसु अर्थात् दोष रहित है ॥२॥

प्रसंग—दयार्द्र राजा नन्दिनी के पीछे-पीछे आती हुई सुदक्षिणा को लौटाकर स्वयम् नन्दिनी की सेवा में तत्पर हो गये—

निवर्त्य राजा दयितां दयालुस्तां सौरभेयीं सुरभिर्यशोभिः।
पयोधरीभूतचतुःसमुद्रां जुगोप गोरूपधरामिवोर्वीम् ॥३॥

अन्वयः—यशोभिः सुरभिः दयालुः राजा दयितां निवर्त्य पयोधरीभूतचतुःसमुद्राम् ताम् सौरभेयीं गोरूपधरां उर्वीम् इव जुगोप ॥३॥

संस्कृत टीका—यशोभिः=कीर्तिभिः, सुरभिः=मनोज्ञः, दयालुः=दयावान्, राजा=दिलीपः, दयितां=पत्नीं सुदक्षिणाम् निवर्त्य=आश्रमं प्रति परावर्त्य, पयोधरीभूतचतुःसमुद्राम्=स्तनीभूतचतुःसंख्याकसागराम्, ताम्=पूर्वोक्ताम्, सौरभेयीम्=कामधेनोः सुतां नन्दिनीम्, गोरूपधराम्=धेनुरूप दधानाम्, उर्वीम्=वसुन्धराम्, इव=यथा, जुगोप=ररक्ष ॥३॥

संस्कृत भावार्थः—सः यशस्वी परमकारुणिको राजा दिलीपः नन्दिनीमनुसरन्तीं स्वपत्नीं सुदक्षिणां गुरोराश्रमं प्रति परावर्त्य स्तनरूपचतुःसमुद्रयुक्तां नन्दिनीं गोरूपधारिणीमुर्वीमिव रक्षितवान् ॥३॥

शब्दार्थ—यशोभिः=कीर्त्ति से। सुरभिः=मनोहर। दयिताम्=प्रिया सुदक्षिणा को। निर्वत्य=लौटाकर। सौरभेयीम्=कामधेनुपुत्री नन्दिनी को। पयोधरीभूतचतुःसमुद्राम्=पयोधरीभूत स्तन (थन) रूप चार समुद्रों वाली। गोरूपधराम्=गाय का रूप धारण करने वाली। उर्वीम्=पृथ्वी। जुगोप=रक्षा करने लगे ॥३॥

हिन्दी अर्थ—यश से सुशोभित, दयालु स्वभाववाले राजा दिलीप ने अपनी पत्नी सुदक्षिणा को गुरु के आश्रम को लौटाकर चार स्तनों के रूप में चारों समुद्रों को धारण करने वाली नन्दिनी की गाय का रूप धारण करने वाली पृथ्वी के समान रक्षा करने लगे ॥३॥

समास—पयोधरीभूतचतु:समुद्राम्=न पयोधरा: अपयोधरा:, अपयोधरा: पयोधरा: सम्पद्यमाना: पयोधरीभूता:, पयोधरीभूता: चत्वार: समुद्रा: यस्या: सा ताम् (बहुव्रीहि) ॥३॥

व्याकरण—दयालु:=दय्+आलुच् । दयिताम्=दय्+क्त+टाप् । निवर्त्य=नि+वृत्+णिच्+क्त्वा (ल्यप्) । गोरूपधराम्=गोरूप+धृ+अच्+टाप् । जुगोप=गुप्+लिट् प्र० पु० ए० व० ॥३॥

विशेष–प्रस्तुत श्लोक में 'दयितां दयालु:' तथा 'सीरभेयी सुरभिर्यशोभि:' में क्रमश: द य वर्णों का और स र भ वर्णो का एक बार साम्य होने से वृत्यनुप्रास है । इसके अतिरिक्त नन्दिनी का पृथ्वी से सादृश्य प्रकट करने के कारण उपमा तो पूर्ण रूप से है ही । 'पयोधरीभूत' शब्द में श्लेष भी है । पृथ्वी के पक्ष में गोरूपधारिणी शब्द का अर्थ होगा कि समुद्र पयोधर न होकर भी पयोधर हो गये है, और नन्दिनी गाय के पक्ष में अर्थ होगा कि जिसके दूध से समुद्र भी अधरीभूत अर्थात् तिरस्कृत हो गया है । अन्त में व्यतिरेकालंकार की उत्कृष्टता भी कही जा सकती है क्योंकि यहाँ उपमान की अपेक्षा उपमेय में अधिक गुण बताये गये हैं । उपमान चारसमुद्रों से उपमेय चारस्तनों की उत्कृष्टता दिखाई गई है ।

इस श्लोक में "दयालु और दयिता शब्दों के प्रयोग पूर्ण उपयुक्त एवं साभिप्रायात्मक रूप में हैं" । राजा दयालु होने के कारण दयिता की सुकुमारता को जानता है, और गोसेवा के लिए साथ में वनगमन करने वाली रानी सुदक्षिणा को वन में कष्ट होगा, यह विचार कर लौटा देता है । ऐसा कार्य एक दयालु पति ही दयापात्र पत्नी के प्रति कर सकता है ॥३॥

प्रसंग :—नन्दिनी का अनुगमन करने वाली सुदक्षिणा को वापिस लौटाकर राजा दिलीप ने गाय के पीछे आते हुए शेष सेवक वर्ग को भी लौटा दिया—

व्रताय तेनानुचरेण धेनो: न्यषेधि शेषोऽप्यनुयायिवर्ग: ।
न चान्यतस्तस्य शरीररक्षा स्ववीर्यगुप्ता हि मनो: प्रसूति: ॥४॥

अन्वय :—व्रताय धेनो: अनुचरेण तेन शेष: अनुयायिवर्ग : अपि न्यषेधि । तस्य शरीररक्षा च अन्यत: न, हि मनो: प्रसूति: स्ववीर्यगुप्ता (भवति) ॥३॥

संस्कृत टीका :—व्रताय=पुत्रप्राप्त्यर्थं गोसेवारूपनियमपालनार्थं, धेनोः=नन्दिन्याः, अनुचरेण=सेवकेन, तेन=राज्ञा दिलीपेन, शेषः=अवशिष्टः, अनुयायिवर्गः=सेवकसमूहः । अपि=समुच्चये, न्यषेधि=निर्वर्तितः । राज्ञः=दिलीपस्य, शरीररक्षा=गात्ररक्षणं च, अन्यतः=अन्यस्मात्, न=नहि, हि=यतः, मनोः=मनुनामकस्य नृपस्य, प्रसूतिः=सन्ततिः, स्ववीर्यगुप्ता=आत्मपराक्रमरक्षिता भवति ॥४॥

संस्कृतभावार्थ—पुत्रप्राप्त्यर्थं गोसेवारूपनियमपालनार्थं सौरभेय्याः सेवकेन तेन राज्ञा दिलीपेन अवशिष्टोऽपि अनुयायिवर्गः धेनोर् अनुसरणान्निवारितः । राज्ञः दिलीपस्य शरीररक्षणाय अन्यस्य कस्यचिदपि पुरुषस्य आवश्यकता नास्ति, यतः मनोः सन्ततिः स्वपराक्रमेणैव स्वं रक्षितुं समर्था भवति ॥४॥

शब्दार्थ—व्रताय=गोसेवारूप व्रत पालन के लिए। अनुचरेण=सेवक। तेन=राजा दिलीप ने। शेषः=बचे हुए। अनुयायिवर्गः=सेवकों को। न्यषेधि=लौटा दिया। अन्यतः=दूसरे से। स्ववीर्यगुप्ता=अपने पराक्रम से रक्षित। मनोः प्रसूतिः=मनु की सन्तान ॥४॥

हिन्दी अर्थ—पुत्रप्राप्ति के लिए राजा दिलीप ने बचे हुए सेवकों को भी वापिस लौटा दिया। राजा को अपने शरीर की रक्षा के लिए किसी अन्य की आवश्यकता नहीं थी, क्योंकि मनु की सन्तान तो अपने ही पराक्रम से स्वयं की रक्षा करती है ॥४॥

समास—अनुयायिवर्गः=अनुयायिनां वर्गः (षष्ठीतत्पुरुष)। शरीररक्षा=शरीरस्य रक्षा (षष्ठीतत्पुरुष)। स्ववीर्यगुप्ता=स्वस्य वीर्येण गुप्ता (षष्ठी, तृतीया तत्पुरुष)।

व्याकरण—अनुचर=अनु+चर्+ट। न्यषेधि=नि+सिध्+लुङ् प्र. पु०ए०व० (कर्मवाच्य)। शेषः=शिष्+घञ्। अनुयायि=अनु+या+णिनि। अन्यतः=अन्य+तसिल्। गुप्ता=गुप्+क्त+टाप्। प्र+सू+क्तिन्। वीर्य=वीर+यत् ॥४॥

विशेष—राजाओं के शरीर की रक्षा के लिये पीछे सेवक वर्ग रहता था। परन्तु इस समय राजा पुत्र-प्राप्ति के निमित्त स्वयं नन्दिनी की सेवा में संलग्न था। सम्भव था गोसेवारूप व्रत में आने वाले कष्टों को कोई सेवक स्वामी पर

आया हुआ समझ कर स्वयं वहन कर लेता, अतः राजा ने सभी सेवकों को वापिस कर दिया, क्योंकि राजा सभी कष्टों को स्वयम् उठाना चाहता था। अपनी रक्षा के लिये राजा को किसी अन्य की आवश्यकता नहीं थी। सेवकों को साथ में रखना उपचारमात्र के लिये ही था। अतः राजा ने समस्त औपचारिकताओं का परित्याग कर दिया। 'व्रताय' शब्द के प्रयोग से यह स्पष्ट है कि राजा किसी दबाव या अनिच्छा से गो-सेवा में तत्पर नहीं हुआ है। इसके अतिरिक्त जो व्यक्ति स्वयं की सेवा चाहेगा वह दूसरों की सेवा क्या कर सकेगा ?

इस श्लोक में "राजा दिलीप को अपने शरीर की रक्षा के लिये अन्य किसी सेवक आदि की आवश्यकता नहीं थी" इस विशेष का समर्थन "मनु की संतान अपनी रक्षा अपने पराक्रम से करते हैं" इस सामान्य कथन के द्वारा किया गया है अतः यहां 'अर्थान्तरन्यास' अलंकार है। ॥४॥

प्रसंगः—सुदक्षिणा तथा सेवकों को लौटाने के पश्चात् राजा गो-सेवा में लग जाते हैं—

आस्वादवद्भिः कवलैस्तृणानाँ कण्डूयनैर्दंशनिवारणैश्च।
अव्याहतैः स्वैरगतैः स तस्याः सम्राट् समाराधनतत्परोऽभूत् ॥५॥

अन्वयः—सः सम्राट् तृणानाम् आस्वादवद्भिः कवलैः, कण्डूयनैः, दंशनिवारणैः, अव्याहतैः स्वैरगतैः च तस्याः समाराधनतत्परः अभूत् ॥५॥

संस्कृत टीका—सम्राट्=चक्रवर्ती, सः=राजा दिलीपः, तृणानाम्=शष्पानाम्, आस्वादवद्भिः=स्वादयुक्तैः, कवलैः=ग्रासैः, कण्डूयनैः=खर्जनैः, दंशनिवारणैः=वनमक्षिकादूरीकरणैः, अव्याहतैः=अप्रतिहतैः, स्वैरगतैः=स्वच्छन्दविचरणैः, च तस्याः=नन्दिन्याः, समाराधनतत्परः=सेवानिरतः, अभूत्=बभूव ॥४॥

संस्कृत भावार्थ—महामण्डलेश्वरः राजा दिलीपः कदाचित् तृणानाम् स्वादुयुक्तग्रासानां प्रदानेन, कदाचित् खर्जनेन, कदाचित् वनमक्षिकावारणेन, कदाचित् अव्याहतमन्दगमनेन च नन्दिन्याः सेवायां संलग्नोऽभूत् ॥५॥

शब्दार्थ—सम्राट्=राजा दिलीप। तृणानाम्=घासों के। आस्वादवद्भिः=स्वादयुक्त। कवलैः=ग्रासों से। कण्डूयनैः=खुजलाने से। दंश-

निवारणैः=मच्छर आदि के दूर करने के द्वारा। अव्याहतैः=अबाध, निर्विघ्न। स्वैरगतैः=स्वतन्त्र गमन के द्वारा। समाराधनतत्परः=सेवा में संलग्न ॥५॥

हिन्दी अर्थ—चक्रवर्ती राजा दिलीप घास के स्वादिष्ट ग्रासों को खिलाते हुए, खुजलाते हुए, वन में डांस आदि को नन्दिनी से दूर भगाते हुए, तथा उसके निर्विघ्न स्वच्छन्द गमन का अनुसरण करते हुए उसकी सेवा में संलग्न हो गया ॥५॥

समास—दंशनिवारणैः=दंशानां निवारणैः (षष्ठीतत्पु०)। स्वैरगतैः= स्वैराणि गतानि तैः (कर्मधारय.)। समाराधनतत्परः=समाराधने तत्परः (सप्तमी तत्पु०)।

व्याकरण—सम्राट्=सम्+राज्+क्विप्, कण्डूयनैः=कण्डू+यक्+ल्यु (अन)। निवारणैः=नि+वृ+णिच्+ल्युट् (अन)। अव्याहतैः=अ+वि+आ+हन्+क्त। गतैः=गम्+क्त। समाराधन=सम्+आ+राध् ल्युट् (अन)। अभूत्=भू+लुङ्, प्र.पु०ए.व० ॥५॥

विशेष—महामण्डलेश्वर होते हुये भी राजा दिलीप ने सन्तान-प्राप्ति के निमित्त जब गोसेवा का व्रत धारण किया तब वे अपने गुरु वसिष्ठ के द्वारा बताये हुए साधनों से गाय की सेवा में संलग्न हो गये। 'अव्याहतैः स्वैरगतैः' शब्दों द्वारा उसी सेवा-भाव की ओर इंगित किया गया है तथा राजा की नन्दिनी में विशेष श्रद्धा का प्रकाशन हो रहा है।

प्रस्तुत श्लोक में नन्दिनी की सेवा के स्वाभाविक रूप का वर्णन किये जाने के कारण स्वभावोक्ति अलकार है ॥५॥

प्रसंगः—महाकवि कालिदास वन में राजा दिलीप के द्वारा नन्दिनी की सेवा का वर्णन करते हुए कहते हैं—

स्थितः स्थितामुच्चलितः प्रयातां निषेदुषीमासनबन्धधीरः।
जलाभिलाषी जलमाददानां छायेव तां भूपतिरन्वगच्छत् ॥६॥

अन्वयः—भूपतिः ताम् स्थिताम् स्थितः, प्रयाताम् उच्चलितः, निषेदुषीम् आसनबन्धधीरः, जलम् आददानाम्, जलाभिलाषी, छाया इव अन्वगच्छत् ॥६॥

संस्कृत टीका—भूपतिः = राजा दिलीपः । ताम् = नन्दिनीम् । स्थिताम् = अवस्थिताम्, स्थितः = अवस्थितः, प्रयाताम् = प्रचलिताम्, उच्चलितः = प्रस्थितः, निषेदुषीम् = उपविष्टाम् । आसनबन्धधीरः = निश्चलभावेनोपविष्टः, जलमाददानाम् = पयःपिबन्तीम्, जलाभिलाषी = जलपानेच्छुः सन् । छाया इव = प्रतिबिम्ब इव, अन्वगच्छत् = अनुसरणमकरोत् ॥६॥

संस्कृत भावार्थ—यद् यद् नन्दिन्या आचरितम्, तत्तदेव राजादिलीपेनानुसृतम् । यदा सा स्वेच्छया गमनं त्यक्त्वा स्थिता बभूव, राजापि तथैव स्थितवान् । यदा तया स्वेच्छया गमनं कृतं राज्ञापि तस्याः अनुसरणं कृतम्, यदा सा यत्र कुत्रापि स्वेच्छया उपविष्टा राजापि तथैव निश्चलभावेन स्थितोऽभवत् । यदा तया पयःपानं कृतं तदा राज्ञापि जलाभिलाषा कृता । एवं प्रकारेण राज्ञा सर्वतोभावेन नन्दिन्याः छाया इव अनुसरणं कृतम् ॥६॥

शब्दार्थ—स्थिताम् = खड़े होने पर । स्थितः = खड़े रहते थे । प्रयाताम् = चलने पर । उच्चलितः = चलते थे । निषेदुषीम् = बैठने पर । आसनबन्धधीरः = आसन लगाकर बैठ जाते थे । जलमाददामाम् = जल ग्रहण करने पर । जलाभिलाषी = जल की इच्छा करते थे । छायेव = छाया के समान ॥६॥

हिन्दी अर्थ—राजा दिलीप नन्दिनी के खड़े हो जाने पर खड़े हो जाते थे । जब वह चलती थी तो राजा भी चलने लगते थे । जब वह बैठ जाती थी तो राजा भी बैठ जाते थे । जब वह जल पीती थी तो राजा भी जल पीते थे । इस प्रकार राजा ने छाया के समान नन्दिनी का अनुसरण किया ॥६॥

समास—आसनबन्धधीरः = आसनस्य बन्धे धीरः (तत्पुरुष.) । जलाभिलाषी = जलस्य अभिलाषी (षष्ठीतत्पुरुष) । भूपतिः = भुवः पतिः (षष्ठी तत्पुरुष) ।

व्याकरण—स्थितः = स्था + क्तः । उच्चलितः = उत् + चल + क्त । प्रयाताम् = प्र + या + क्त + टाप् । निषेदुषीम् = नि + सद् + क्वसु + ङीप् । आसन = आस् + ल्यु (अन) । अन्वगच्छत् = अनु + गम् लङ् लकार प्र. पु. ए. व. ॥६॥

विशेष—नन्दिनी वन में जिस प्रकार का आचरण करना चाहती थी उसके लिये स्वतन्त्र थी । राजा केवल उसका अनुसरण इस प्रकार कर रहे थे,

मानो वे उसके प्रतिबिम्ब मात्र हों। सेवा कार्य में सेवक की इच्छा का व्याघात होना सेवक की अपटुता का द्योतक ही है। वशिष्ठ मुनि ने भी राजा को इसी प्रकार की सेवा करने का आदेश दिया था। कहा था कि—इसके चलने पर चलना, स्थिति होने पर स्थित होना, बैठने पर बैठ जाना, जल पान करने पर जल पीना (रघु० १-८९)। ठीक उसी प्रकार की सेवा राजा दिलीप ने की, यह प्रदर्शित किया गया है।

उक्त श्लोक में उपमालंकार हैं। यहाँ भूपति उपमेय, छाया उपमान, अनुगमन करना साधारण धर्म, और इव उपमावाचक है ॥६॥

प्रसंग—गाय की सेवा में संलग्न राजा दिलीप के सौन्दर्य का वर्णन करते हुए महाकवि कहते हैं—

स न्यस्तचिह्नामपि राजलक्ष्मीं तेजोविशेषानुमितां दधानः।
आसीदनाविष्कृतदानराजिरन्तर्मदावस्थ इव द्विपेन्द्रः ॥७॥

अन्वय—न्यस्तचिह्नाम् अपि तेजोविशेषानुमिताम् राजलक्ष्मीम् दधानः सः अनाविष्कृतदानराजिः अन्तर्मदावस्थः द्विपेन्द्रः इव आसीत् ॥७॥

संस्कृत टीका—न्यस्तचिह्नामपि= परित्यक्तछत्रचमरादिराजलक्षणामपि, तेजोविशेषानुमिताम्=प्रभावातिशयेन परिज्ञाताम्। राजलक्ष्मीम्=राजश्रियम्, दधानः=धारयन्, सः=राजा दिलीपः, अनाविष्कृतदानराजिः=बहिरप्रकटिमदलेखः। अन्तर्मदावस्थः=आभ्यन्तरमदवारियुक्त, द्विपेन्द्रः=गजराजः। इव=यथा, आसीत् ॥८॥

संस्कृतभावार्थ—गोसेवापरायणो राजा दिलीपः व्रतका णात् सर्वाणि राजसूचकानि उपकरणादीनि छत्रचमारादीनि परित्यक्तवान्। तथापि स्वकीयवीर्यप्रभावातिशयेन स्वचक्रवर्तित्वं धारयन् अप्रकटितमदलेख आभ्यन्तरमदस्थितः गजेन्द्र इव आसीत् ॥७॥

शब्दार्थ—न्यस्तचिह्नाम्=छत्रचामरादि राजचिह्नों से रहित। तेजोविशेषानुमिताम्=प्रभावातिशय से अनुमित। राजलक्ष्मीम्=राजलक्ष्मी को। दधानः=धारण किये हुए। अनाविष्कृतदानराजिः=जिसकी मदलेखा अभी प्रकट नहीं हुई है। अन्तर्मदावस्थः=जिसकी मद की अवस्था भीतर स्थित है। द्विपेन्द्रः=गजेन्द्र ॥७॥

हिन्दी—छत्रचमरादि राजसूचक चिन्हों का परित्याग कर देने पर भी प्रभावातिशय से अनुमान की जाती हुई राजलक्ष्मी को धारण करता हुआ वह राजा दिलीप ऐसे हाथी के समान था, जिसकी मदरेखा अभी बाहर नहीं प्रस्फुटित हुई है परन्तु उसके भीतर ही भीतर मद है ।।७।।

समास—न्यस्तचिह्नाम्=न्यस्तानि चिह्नानि यस्याः सा ताम् (बहुव्रीहि)। राजलक्ष्मीम्=राज्ञलक्ष्मी (षष्ठीतत्पुरुष)। तेजोविशेषानुमिताम्=तेजसां-विशेषः तेन अनुमिताम् (तत्पुरुष.) । अनाविष्कृतदानराजिः=अनाविष्कृताः दानस्य राजयः यस्य सः (बहुव्रीहि.) । अन्तर्मदावस्थः=अन्तर्गता मदस्य अवस्था यस्य सः (बहु०) ।।७।।

व्याकरण—न्यस्त=नि+अस्+क्त । अनुमित=अनु+मा+क्त । दधानः=धा+शानच् । आविष्कृत=आविस्+कृ+क्त । दान=दा+ल्युट् (अन) ।।७।।

विशेष—प्रस्तुत श्लोक में राजादिलीप के तेजस्वी होने का वर्णन है। इसके साथ ही यह प्रदर्शित किया गया है कि मुकुट, छत्र आदि से ही कोई राजा नहीं होता, अपितु राजा के अन्दर एक विशिष्ट तेज होता है जो सब अवस्था में अपने प्रभाव को प्रदर्शित करता है। राजा द्वारा गोसेवा व्रत को स्वीकार कर लेने पर राजोचित सम्मान का परित्याग किया जाना उसकी महत्ता का द्योतक है।

यहाँ उपमालंकार है। राजा दिलीप उपमेय, द्विपेन्द्र उपमान, अतिशय तेजस्वी होना साधारण धर्म और इव उपमा वाचक शब्द है ।।७।।

प्रसंग—राजा दिलीप जो सेवा करते हुए धनुष वाण हाथ में लेकर हाथी के समान वन में विचरण कर रहे हैं—

लताप्रतानोद्ग्रथितैः स केशैरधिज्यधन्वा विचचार दावम् ।
रक्षापदेशान्मुनिहोमधेनोर्वन्यान् विनेष्यन्निव दुष्टसत्वान् ।।८।।

अन्वय—लताप्रतानोद्ग्रथितैः केशैः अधिज्यधन्वा सः मुनिहोमधेनोः रक्षापदेशात् वन्यान् दुष्टसत्वान् विनेष्यन् इव दावम् विचचार ।।८।।

संस्कृतटीका—लताप्रतानोद्ग्रथितैः=वल्लीतन्तुबद्धैः, केशैः=कचैः। अधिज्यधन्वा=समारोपितमौर्वीचापः, सः=राजा दिलीपः, मुनिहोमधेनोः=वशिष्ठस्य होमसाधनभूतायाः नन्दिन्याः, रक्षापदेशात्=रक्षणस्य व्याजात्,

वन्यान्=आरण्यकान्, दुष्टसत्वान्=हिंसकजीवान्, विनेष्यन्निव=शिक्षयिष्यन्निव, दावम्=वनं, विचचार=अभ्रमत् ॥८॥

संस्कृतभावार्थ—गोसेवापरायणेन राज्ञा दिलीपेन वनजाताभिः लतातन्तुभिः स्वकेशानि उद्ग्रथितानि। वने विचरन् सः एवं प्रतीयते यत् नन्दिन्याः रक्षण-व्याजेन वनस्य हिंसकान् जन्तून् नम्रतां शिक्षयति ॥८॥

शब्दार्थ—लताप्रतानोद्ग्रथितैः=लताओं के सूत्रों से ग्रथित (गुम्फित) अधिज्यधन्वा=प्रत्यञ्चा चढ़े हुए धनुष वाले। रक्षापदेशात्=रक्षा के बहाने से। वन्यान्=जंगली। दुष्टसत्वान्=हिंसक जीवों को। विनेष्यन्निव=शिक्षित करते हुए के समान। दावम्=वन में। विचचार=विचरण करने लगे ॥८॥

हिन्दी अर्थ—लताओं के तन्तुओं से गुथे हुए केशों से युक्त राजा दिलीप चढ़ी हुई प्रत्यञ्चा वाले धनुष को हाथ में लिये हुए महर्षि वशिष्ठ के यज्ञ की सामग्री घृतादि वस्तुओं को प्रदान करने वाली नन्दिनी की रक्षा के व्याज से मानो जंगली हिंसक जीवों को (शासन करने के लिए) वन में विचरण कर (रहे थे)।८॥
शिक्षित करते हुए के समान

समास—लताप्रतानोद्ग्रथितैः=लतानां प्रतानैः उद्ग्रथिताः तैः (तत्पुरुष समास)। अधिज्यधन्वा=अधिगता ज्या यस्य सः (बहुव्रीहि) अधिज्यं धनुः यस्य सः (बहुव्रीहि)। रक्षापदेशात्=रक्षाया अपदेशात् (षष्ठी तत्पु०)। मुनिहोमधेनोः=मुनेः होमस्य धेनोः (तत्पुरुष.)। दुष्टसत्वान्=दुष्टान् सत्वान् (कर्मधारय.)।

व्याकरण—उद्ग्रथितः=उद्+ग्रन्थ्+क्त। केशैः="इत्थं भूतलक्षणे" से तृतीया। अपदेशान्=अप+दिश्+घञ्। विनेष्यन्=वि+नी+लृट्+शतृ। दुष्ट=दुष्+क्त ॥८॥

विशेष—वन में नन्दिनी के पीछे-पीछे जाते हुए राजा के कुशलताओं के तन्तुओं से उलझने के कारण बँधे से हो गये। बड़ी परेशानी को सहते हुए भी राजा दिलीप ने वन में विचरण बन्द नहीं किया। प्रस्तुत श्लोक में मुनि की गाय की रक्षा करना उपमेय के स्थान पर कवि ने वन्य प्राणियों को विनय सिखाना इस उपमान की सम्भावना की है अतः यहाँ उत्प्रेक्षा अलंकार है ॥८॥

प्रसंग—मण्डलेश्वर राजा दिलीप द्वारा गौसेवाव्रत के स्वीकार कर लिये जाने के कारण उसकी महिमा एवं तेजस्विता से प्रभावित पशुपक्षी अपने सुमधुर शब्दों से मानो राजा का जय-जयकार कर रहे हैं—

विसृष्टपार्श्वानुचरस्य तस्य पार्श्वद्रुमाः पाशभृता समस्य ।
उदीरयामासुरिवोन्मदानामालोकशब्दं वयसां विरावैः ॥९॥

अन्वय—विसृष्टपार्श्वानुचरस्य पाशभृता समस्य तस्य पार्श्वद्रुमाः उन्मदानां वयसां विरावैः आलोकशब्दं इव उदीरयामासुः ॥९॥

संस्कृत टीका—विसृष्टपार्श्वानुचरस्य=निवर्तितनिकटवर्तिसेवकवृन्दस्य, पाशभृता समस्य=वरुणेन सदृशस्य, तस्य=राज्ञो दिलीपस्य, पार्श्वद्रुमाः=पार्श्ववर्तिनो वृक्षाः, उन्मादानाम्=उत्कटहर्षयुक्तानाम् वयसाम्=पक्षिणाम् विरावैः=ध्वनिभिः, आलोकशब्दम्=जयध्वनिम्, इव=यथा, उदीरयामासु;=उच्चारयामासुः ॥९॥

संस्कृत भावार्थ—राज्ञा दिलीपेन सर्वोऽपि पार्श्ववर्तिसेवकवृन्दस्तथा जयशब्दोच्चारणपटुः वन्दिवृन्दश्च आश्रमं प्रति निवर्तितः । तथापि तस्य वरुणदेव तुल्यप्रतापातिशयेन प्रभाविताः तस्य पार्श्वे स्थिताः वृक्षाः एव स्वशाखासु उपविष्टानां खगानां कलध्वनिभिः तस्य जयशब्दं चक्रुः, एवं प्रतीयते ॥९॥

शब्दार्थ—विसृष्टपार्श्वानुचरस्य=जिसने समीपवर्ती नौकरों को विदा कर दिया है । पाशभृता=वरुण के । समस्य=समान । पार्श्वद्रुमाः=समीप के पेड़ । उन्मादानाम्=मदमस्त । वयसाम्=पक्षियों के । विरावैः=शब्दों के द्वारा । आलोकशब्दम्=जयकार का शब्द । उदीरयामासुः=उच्चारण किया ॥९॥

हिन्दी अर्थ—साथ में रहने वाले सेवक वृन्द को छोड़ देने पर भी वरुण के समान प्रभावशाली उस राजा दिलीप का (पास) के वृक्ष उन्मत्त पक्षियों के शब्दों द्वारा मानो जय-जय शब्द का उच्चारण कर रहे थे । ॥ ९ ॥ अत्यधिक हर्षित

समास—विसृष्टपार्श्वानुचरस्य=विसृष्टाः पार्श्ववर्तिनो अनुचरा येन सः तस्य (बहुव्रीहि. । पाशभृता=पाशं बिभर्तितेन (उपपदसमास) । पार्श्वद्रुमाः=पार्श्ववर्तिनः द्रुमाः (कर्मधारय) । उन्मदानाम्=उत्कृष्टः मदो येषाम्तेषाम् (बहुव्रीहि) । आलोक शब्दम्=आलोकस्य शब्दम् (षष्ठीतत्पुरुष) ॥९॥

व्याकरण—विसृष्ट=वि+सृज्+क्त । अनुचर=अनु+चर्+ट । पाशभृता=पाश+भृ+क्विप् । विरावैः=वि+रू+घञ् । आलोक=आ+लोक+घञ् । उदीरयामासुः=उद्+ईर+लिट् लकार प्र. पु० बहुवचन ॥९॥

विशेष—प्रस्तुत श्लोक में राजा का सादृश्य बताये जाने के कारण उपमा है। राजा दिलीप उपमान, वरुण उपमेय, सम उपमा का वाचक है। यहां साधारण धर्म का लोप होते से धर्मलुप्ता उपमा है।

यहां उत्प्रेक्षा अलंकार भी है। क्योंकि वृक्षों पर होने वाले पक्षियों की कल ध्वनियों की कवि ने वृक्षों द्वारा किये गये जयकार से उत्प्रेक्षा की है। अर्थात् वृक्षों पर जो पक्षी बोल रहे हैं वह मानो वृक्षों द्वारा राजा का जय-जय कार कर रहे हैं। ॥ ९ ॥

प्रसंग—अब वनवासी राजा का वन में फैलने वाली लताओं द्वारा स्वागत का वर्णन किया जा रहा है—

मरुत्प्रयुक्ताश्च मरुत्सखाभं तमर्च्यमारादभिवर्तमानम्।
अवाकिरन् बाललताः प्रसूनैराचारलाजैरिव पौरकन्याः॥ १० ॥

अन्वय—आराद् अभिवर्तमानम् मरुत्सखाभम् अर्च्यम् तम् मरुत्प्रयुक्ताः बाललताः पौरकन्या आचारलाजैः इव प्रसूनैः अवाकिरन् ॥ १० ॥

संस्कृतटीका—आराद्=समीपम्, अभिवर्तमानम्=विचरन्तम्, मरुत्सखाभम्=अग्निसमतेजसम्, अर्च्यम्=पूज्यनीयम्, तम्=राजानं दिलीपम्, मरुत्प्रयुक्ताः=वायुना इतस्ततश्चालिताः, बाललताः=स्वल्पवल्लर्यः, पौरकन्याः=नगरवासिन्य बालाः, आचारलाजैः=स्वागतार्थप्रयुक्तैः मंगललाजैः। इव= यथा। प्रसूनैः=कुसुमैः। अवाकिरन्=अवर्षन् ॥ १० ॥

संस्कृत भावार्थ—समीपे विचरन्तं राजानं दिलीपम् वायुप्रेरिताः बाललताः स्वप्रसूनैः तथा अभिनन्दयामासुः, यथा नागरिकाः कन्याः स्वागतसमये राजानम आचारलाजैः अभिवर्षन्ति ॥१०॥

शब्दार्थ—मरुत्प्रयुक्ताः=वायु से प्रेरित। बाललता=कोमल लतायें। आरात्=समीप। अभिवर्तमानम्=विद्यमान। मरुत्सखाभम्=वायु के मित्र अग्नि के समान। अर्च्यम्=पूज्य। प्रसूनैः=फूलों से। पौरकन्याः=नगर की कन्यायें। आचारलाजैः=मांगलिक खीलों से। अवाकिरन्=वर्षा की ॥१०॥

हिन्दी अर्थ—समीप में विचरण करने वाले, मरुत् के मित्र अग्नि की सदृश कान्ति वाले, पूजनीय उस राजा दिलीप पर वायु से हिलाई जाती हुई छोटी-छोटी बेलें इस प्रकार राजा पर पुष्प वर्षा कर रही थीं जिस प्रकार नगर निवासिनी कन्यायें राजा के स्वागत के समय खीलें बिखेरती हैं।१०।

समास—मरुत्प्रयुक्ताः=मरुता प्रयुक्ताः (तत्पुरुष)। बाललताः=बालाश्च ताः लताः (कर्मधारय)। आचारलाजैः=आचारार्थ लाजैः (तत्पुरुष मध्यम-पदलोपी समास)। पौरकन्याः=पौराश्च ताः कन्याः (कर्मधारय) ॥१०॥

व्याकरण—प्रयुक्त=प्र+युज्+क्त। अर्च्यम्=ऋच्+यत्। अभिवर्त-मानम्=अभि+वृत्+शानच्। प्रसून=प्र+सू+क्त। आचार=आ+चर्+घञ्। पौर=पुर+अण्। ॥ १० ॥

विशेषः—प्रस्तुत श्लोक में "मरुत्सखाभम्" में वाचक लुप्तोपमा है। क्यों कि राजा उपमेय, अग्नि उपमान, और आभा साधारण धर्म है। वाचक शब्द न होने के कारण वाचकलुप्तोपमा है। साथ ही नीचे वाले पद में पूर्णोपमा है। यहाँ पौरकन्या उपमान, बाललता उपमेय, अवाकिरन् साधारण धर्म और इव उपमा का वाचक है। प्रकृति के विभिन्न विषयों द्वारा राजा दिलीप की महत्ता का प्रकाशन किया गया है ॥ १० ॥

प्रशंग—सेवानिरत तेजस्वी राजा दिलीप को वन की हरिणियां भी उनकी दयालुतासे प्रभावित होकर उन्हें देख रही हैं—

धनुर्भृतोऽप्यस्य दयार्द्रभावमाख्यातमन्तःकरणैर्विशङ्कैः।
विलोकयन्त्यो वपुरापुरक्ष्णां प्रकामविस्तारफलं हरिण्यः ॥ ११ ॥

अन्वयः—धनुर्भृतः अपि अस्य विशंकैः अन्तःकरणैः दयार्द्रभावम् आख्यातम् वपु विलोकन्त्यः हरिण्यः अक्ष्णाम् प्रकामविस्तारफलं आपुः ॥ ११ ॥

संस्कृतटीका—धनुर्भृतः अपि=धनुर्धारिणः अपि, अस्य=राज्ञः दिलीप-स्य, विशंकैः=निःशंकैः, अन्तःकरणैः=अन्तरिन्द्रियैः, दयार्द्रभावम्=करुणा-र्द्रभावम्। आख्यातं=प्रकटीकृतम्। वपुः=शरीरम्। विलोकयन्त्यः=पश्यन्त्यः। हरिण्यः=मृग्यः। अक्ष्णाम्=नेत्राणाम्। प्रकामविस्तारफलम्=प्रकामविशालतालाभम्। आपुः=अलभन् ॥११॥

संस्कृत भावार्थ—राजा दिलीपः धनुर्धारी आसीत् परन्तु हरिण्यः निःशंकैः हृदयैः दयालुतायुक्तं तस्य वपुः प्रकामं विलोकयन्त्यः स्वनेत्राणाम् विस्तारस्य फलं अलभन्। तथा मृग्यः धनुर्भृतं तं विलोक्य पलायनं न कुर्वन्ति, किन्तु तम् विशेषरूपेण विलोकयन्ति ॥ ११ ॥

शब्दार्थ:—धनुर्भृतः=धनुष धारण करने वाले। विशंकैः=शंका रहित (निःशंक)। अन्तःकरणैः= हृदय से। दयार्द्रभावम्=दया के द्वारा आर्द्र भाव को। आख्यातम्=कहा गया। वपुः=शरीर को। विलोकयन्त्यः= देखती हुई। अक्ष्णाम्=नेत्रों के। प्रकामविस्तारफलम्=अत्यन्त विशालता के फल को। आपुः= प्राप्त किया ॥ ११ ॥

हिन्दी अर्थ—धनुष को धारण करने वाले भी राजा दिलीप के दया के भाव को प्रकट करने वाले शरीर को भय से रहित हृदयों से देखती हुई हिरणियों ने अपने नेत्रों के अत्यधिक विस्तृत होने का लाभ उठाया ॥ ११ ॥

समास—धनुर्भृतः=धनुर्बिभर्तीति धनुभृत् तस्य (उपपदसमास)। दयार्द्रभावम्=दयया आर्द्रस्य भावः यस्य स तम् (बहुव्रीहि)। प्रकाम-विस्तारफलम्=प्रकामस्य विस्तारस्य फलम् (षष्ठीतत्पुरुष)। विशंकैः=विगता शंका येषाम्ते तैः (बहुव्रीहि)

व्याकरण—भृतः=भृ+क्विप्। भावम्=भू+घञ्। आख्यातम्= आ+चक्ष्+क्त। अन्तःकरण=अन्तः+कृ+ल्युट्। विलोकयन्त्यः=वि+ लोक्+शतृ+ङीप्। आपुः=आप्+लिट् प्र० पु० बहुवचन।११।

विशेष—यहाँ राजा की परमोत्कृष्ट विशेषता व्यक्त की गई है कि धनुष धारण करने वाले से यद्यपि हरिणियां डरकर दूर भागती हैं परन्तु उसके दयाभाव से हरिणियों को विश्वास है कि यह हमें मारेगा नहीं अतः बहुत देर तक उसे देखती रखती है। राजा की उदारता एवं वन्य जन्तुओं के प्रति प्रेम का प्रदर्शन है।

प्रस्तुत श्लोक में अनुप्रास अलंकार तो है ही साथ ही विरोधाभास भी है। क्योंकि भय को उत्पन्न करने वाले धनुष को देखकर भी हरिणियों के मन भय रहित हैं। परन्तु राजा के दयार्द्र प्रभाव के कारण उनका भय जाता रहता है ॥११॥

प्रसंग—दिलीप को आता हुआ देखकर वृक्ष जय-जयकार करते हुये लताओं द्वारा उन पर फूल बरसाने लगे तथा अपने शब्दों द्वारा राजा का यशोगान करने लगे—

स कीचकैर्मारुतपूर्णरन्ध्रैः कूजद्भिरापादितवंशकृत्यम्।
शुश्राव कुञ्जेषु यशः स्वमुच्चैरुद्गीयमानं वनदेवताभिः ॥१२॥

अन्वयः—स मारुतपूर्णरन्ध्रैः कूजद्भिः कीचकैः आपादितवंशकृत्यम् कुञ्जेषु वनदेवताभिः उच्चैः उद्गीयमानम् स्वम् यशः शुश्राव ॥१२॥

संस्कृत टीका—सः=राजा दिलीपः । मारुतपूर्णरन्ध्रैः=वायुपूरितछिद्रैः कूजद्भिः=शब्दायमानैः । कीचकैः=वेणुभिः । आपादितवंशकृत्यम्=सम्पादितवेणुवाद्यकार्यम् । कुञ्जेषु=लतागृहेषु । वनदेवताभिः=वनदेवीभिः । उच्चैः उच्चस्वरेण । उद्गीयमानम्=गायनंक्रियमाणम् । स्वम्=आत्मीयम् । यशः=कीर्तिम् । शुश्राव=अश्रृणोत् ॥१२॥

संस्कृत भावार्थ—गोसेवापरायणः राजा दिलीपः वने विचरन् आसीत् तदा वायुपूरितछिद्रैः शब्दं कुर्वद्भिः वेणुविशेषैः, वनदेवताभिः गायमानम् स्वकीयं यशः अश्रृणोत् । गायने यत् वंशीवाद्यस्यावश्यकतासीत्, तत् स्वनद्भिः कीचकैः पूर्णं कृतम् ॥१२॥

शब्दार्थ—मारुतपूर्णरन्ध्रैः=वायु से पूर्ण छिद्रों वाले । कूजद्भिः=शब्द करते हुए । कीचकैः=बाँसों से । आपादितवंशकृत्यम्=जिससे बाँसुरी बजने का कार्य पूर्ण किया गया । कुञ्जेषु=लतागृहों में । वनदेवताभिः=वन देवताओं के द्वारा । उच्चैः=ऊँचे स्वर से । उद्गीयमानम्=गाये जाते हुए । स्वम् यशः=अपनी कीर्ति को । शुश्राव=सुना ॥१२॥

हिन्दी अर्थ—राजा दिलीप ने वायु से भरे हुये छिद्रों वाले अतः शब्द करते हुए वांसों द्वारा वांसुरी का कार्य पूर्ण करने वाले वनदेवियों द्वारा कुञ्जों में ऊँचे स्वर से गाये जाने वाले अपने यश को सुना ॥१२॥

समास—मारुतपूर्णरन्ध्रैः=मारुतेन पूर्णानि रन्ध्राणि येषाम् ते तैः (बहुव्रीहि) आपादितवंशकृत्यम्=आपादितं वंशस्य कृत्यं यस्मिन् तत् (तत्पुरुष, बहुव्रीहि) वनदेवताभिः=वनस्य देवताभिः (षष्ठी तत्पुरुष) ।

व्याकरण—कीचकैः=चीक्+वुञ्+अक् (च और क काविपर्यय हुआ है) कूजद्=कूज्+शतृ । उद्गीयमानम्=उद्+गै+यक्+शानच् । शुश्राव=श्रु+लिट् प्र० पु० ए० व० ॥१२॥

विशेष—तात्पर्य है कि वन देवियाँ राजा का यशोगान कर रही थीं । उस गायनकाल में कीचक नाम के विशेष प्रकार के बांस जो वायु के भर जाने के कारण शब्द कर रहे थे मानो वही वन देवताओं की बांसुरी थे । इस प्रकार राजा की महत्ता स्थापित की गई है कि प्रकृति भी दिलीप के सुकृत्यों से प्रभावित हो गई थी ॥१२॥

प्रस्तुत श्लोक में लतागृहों में सुनाई पड़ने वाला कलरव मानो वन देवियों द्वारा किया जाने वाला राजा का यशोगान है और वायु भरने के कारण जो बाँस बज रहे थे वे मानों बांसुरी हैं अतः उत्प्रेक्षा अलंकार है ॥१२॥

प्रसंग—गोसेवा के निमित्त वन में विचरण करने वाले राजा दिलीप की सेवा सुगन्धित पवन भी कर रहा है इसी का वर्णन करते हुये महाकवि कहते हैं—

पृक्तस्तुषारैः गिरिनिर्झराणामनोकहाकम्पितपुष्पगन्धी ।
तमातपक्लान्तमनातपत्रमाचारपूतं पवनः सिषेवे ॥१३॥

अन्वय—गिरिनिर्झराणाम् तुषारैः पृक्तः अनोकहाकम्पितपुष्पगन्धी पवनः अनातपत्रम् आतपक्लान्तम् आचारपुतम् तम् सिषेवे ॥१३॥

संस्कृत टीका—गिरिनिर्झराणाम्=पर्वतवारिप्रवाहाणाम्, तुषारैः=शीतलजलकणैः, पृक्तः=सिञ्चितः, अनोकहाकम्पितपुष्पगन्धी=वृक्षाणाम् ईषदाकम्पितकुसमगन्धवहः, पवनः=वायुः, अनातपत्रम्=छत्ररहितम्, आतपक्लान्तम्=धर्मेण पीडितम्, आचारपूतम्=सदाचारेण पवित्रम्, तम्=राजानम् दिलीपम्, सिषेवे=सेवितवान् ।।१३॥

संस्कृत भावार्थ—वने गोसेवापरायणं सदाचारनिष्ठितं छत्ररहितम् अतएव धर्मेण पीडितं तं राजानम् पर्वतवारिप्रवाहाणाम् शीतलैः जलकणैः सिञ्चितः तथा कुसुमानाम् गन्धापहारकः पवनः सेवितवान् । अर्थात् पवनोऽपि राज्ञः महत्तया प्रेरितः तस्य कष्टनिवारणार्थं यत्नं कृतवान् ॥१३॥

शब्दार्थ—गिरिनिर्झराणाम्=पर्वत के झरनों से । तुषारैः=जलकणों से । पृक्तः=मिश्रित । अनोकहाकम्पितपुष्पगन्धी=वृक्षों के मन्द-मन्द हिलने वाले फूलों के गन्ध से युक्त । पवनः=वायु । अनातपत्रम्=छाते से रहित । आतपक्लान्तम्=धूप से पीड़ित । आचारपूतम्=सदाचार से पवित्र । सिषेवे=सेवा करने लगा ॥१३॥

हिन्दी—पर्वतों से बहने वाले झरनों के शीतल जलकणों से सिञ्चित तथा वृक्षों के कुछ-कुछ हिलते हुए पुष्पों से गन्ध से युक्त वायु छत्र का त्याग करने वाले अतः धूप से पीड़ित होने वाले और सदाचार से पवित्र राजा दिजीप की सेवा की ॥१३॥

समास—गिरिनिर्झराणाम्=गिरीणाम् निर्झराः तेषाम् (षष्ठी तत्पुरुष)। अनोकहाकम्पितपुष्पगन्धी=अनोकहानाम् आकम्पितानाम् पुष्पाणाम् गन्धः (षष्ठी.) सोऽस्यास्तीति। आतपक्लान्तम्=आतपेन क्लान्तम् (तृतीया तत्पुरुष)। अनातपत्रम्=न विद्यते आतपत्रं यस्य सः (बहुव्रीहि)। आचारपूतं=आचारेण पूतम् (तृतीया तत्पुरुष) ॥१३॥

व्याकरण—पृक्तः=पृच्+क्त। कम्पित=कम्प्+क्त। क्लान्तम्=क्लमु+क्त। आतपत्र=आतप+त्रा+क। आचार=आ+चर्+घञ्। पूञ्+क्त। पवनः=पू+ल्युट् (अन)। सिषेवे=सेव+लिट् प्र० पु० ए० व० ॥१३॥

विशेष—पर्वतों से झरने वाले झरनों से शीतल जल कण और वृक्षों के थोड़े से हिलने वाले पुष्पों की सुगन्धि को ग्रहण करने वाले पवन द्वारा छत्रादि से रहित जिसको धूप लग रही थी उस राजा दिलीप की सेवा किया जाना कालिदास द्वारा वायु का मानवीकरण है। प्रस्तुत श्लोक में अनुप्रासालंकार है ॥१३॥

प्रसंग—महाराज दिलीप के वन में प्रवेश करने पर वन में सुख-शान्ति छा गई, वन्य जन्तुओं ने पारस्परिक ईर्ष्याभाव को छोड़ दिया, इसी का वर्णन करते हुये महाकवि कहते हैं—

शशाम वृष्ट्यापि बिना दवाग्निरासीद्विशेषा फलपुष्पवृद्धिः।
ऊनं न सत्वेष्वधिको बबाधे तस्मिन् वनं गोप्तरि गाहमाने ॥१४॥

अन्वय—गोप्तरि तस्मिन् वनं गाहमाने वृष्ट्या विना अपि दवाग्निः शशाम। फलपुष्पवृद्धिः विशेषा आसीत्। सत्वेषु अधिकः ऊनं न बबाधे ॥१४॥

संस्कृतटीका—गोप्तरि=प्रजारक्षके, तस्मिन्=राजनि दिलीपे, वनम्=अरण्यम्। गाहमाने=प्रविचरति सति। वृष्ट्या विनापि=वर्षणेन विनापि। दवाग्निः=दावानलः, शशाम=शान्तोऽभवत्। फलपुष्पवृद्धिः=सस्यप्रसून समृद्धिः, विशेषाः=अतिशययुक्ताः, आसीत्=अभवत्, सत्वेषु=जन्तुषु मध्ये, अधिकः=प्रबलः व्याघ्रादिः, ऊनं=हीनं मृगादिकम्, न=नहि, बबाधे=पीड़ितवान् ॥१४॥

संस्कृतभावार्थ—यदा गोसेवापरायणः राजा दिलीपः वनं प्राविशत्, तदा दवाग्निः वृष्ट्या विनापि शान्तोऽभवत्। तस्य प्रभावातिशयात् वने फलानां

कुसुमानाम् च विशेषवृद्धिरभवत् । वन्यजन्तुषु शक्तिसम्पन्नाः सिंहादयो निर्बल-जीववर्गं मृगादिकं किञ्चिदपि न बबाधे । अर्थात् सर्वे जन्तवः विस्मृतवैराः संजाताः ॥१४॥

शब्दार्थ—गोप्तरि=रक्षक । गाहमाने=प्रवेश करने पर । वृष्ट्या विना=वर्षा के बिना । दावाग्निः=दावानल । शशाम=शांत हो गया । फलपुष्पवृद्धिः=फल और फूलों की समृद्धि । विशेषः=अधिक । सत्त्वेषु=वन जन्तुओं में । अधिकः=बलवान् । ऊनम्=कमजोर को । न बबाधे=नहीं सताया ॥१४॥

हिन्दी—प्रजा की रक्षा करने वाले उस राजा दिलीप के वन में प्रवेश करने पर वन की अग्नि वर्षा के बिना ही शान्त हो गई । वन में फलों और पुष्पों की विशेष वृद्धि हुई । वन्य जीवों में अधिक शक्तिशाली भी कम शक्ति वाले जानवरों को कष्ट नहीं दिया ॥१४॥

समास—फलपुष्पवृद्धिः=फलानि च पुष्पाणि च (द्वन्द्व) तेषाम् वृद्धिः (षष्ठीतत्पुरुष) । दवाग्निः=दवस्य अग्निः (षष्ठी तत्पुरुष) ॥१४॥

व्याकरण—वृष्टया विना=विना के योग में तृतीया विभक्ति । विशेषा=वि+शिष्+घञ्+टाप् । शशाम=शम्+लिट् लकार प्र० पु० ए० वच० । आसीत्=अस्+लुङ् प्र० पु० ए० वच० । बबाधे=बाध्+लिट् प्र० पु० ए० वच० ॥१४॥

विशेष—राजा दिलीप अत्यन्त प्रभावशाली थे, उनके प्रभाव को जड़ और चैतन्य सभी स्वीकार करते थे, उनके वन में प्रवेश करते ही यद्यपि वर्षा नहीं हुई थी, फिर भी वन की अग्नि शान्त हो गई । वृक्ष फल-पुष्प अधिक मात्रा में देने लगे । सबसे विशेष बात यह हुई कि वन के हिंसक जीवों ने भी कमजोर जीवों का सताना छोड़ दिया और सब प्रेम से रहने लगे ।

उक्त श्लोक में वर्षा के बिना ही दवाग्नि का शान्त हो जाना प्रदर्शित किये जाने के कारण विभावना तथा राजा के अतिशय प्रभाव कथन के कारण उदात्तालंकार है ॥१४॥

प्रसंग—प्रस्तुत श्लोक में दिन भर वन में भ्रमण करने के पश्चात् नन्दिनी के वशिष्ठाश्रम की ओर गमन का वर्णन किया जा रहा है—

सञ्चारपूतानि दिगन्तराणि कृत्वा दिनान्ते निलयाय गन्तुम् ।
प्रचक्रमे पल्लवरागताम्रा प्रभा पतंगस्य मुनेश्च धेनुः ॥१५॥

अन्वय—पल्लवरागताम्रा पतंगस्य प्रभा मुनेः धेनुः च दिगन्तराणि संचारपूतानि कृत्वा दिनान्ते निलयाय गन्तुम् प्रचक्रमे ॥१५॥

संस्कृतटीका—पल्लवरागताम्रा = किसलयरक्तिमा इव रक्तवर्णा, पतंगस्य = सूर्यस्य, प्रभाः = कान्तिः, मुनेः = गुरोः वशिष्ठस्य, धेनुः = नन्दिनी च, दिगन्तराणि = दिगवकाशान्, संचारपूतानि = प्रचरणेन पवित्राणि, कृत्वा = विधाय, दिनान्ते = दिवसावसाने, निलयाय = (सूर्यपक्षे) अस्ताचलाय, (धेनुपक्षे) वशिष्ठाश्रमाय, गन्तुम् = परावर्तितुम्, प्रचक्रमे = उपक्रमं कृतवान् ॥१५॥

संस्कृतभावार्थ—ईषद्रक्तवर्णा सूर्यस्य कान्तिः तथा मुनेः धेनुः नन्दिनी च सायंकाले स्व-स्वनिलयाय गन्तुम् उपक्रमं कृतवान् । अर्थात् सूर्यस्य कान्तिः अस्ताचलं गन्तुम् उद्यता अभवत्, गौः च वशिष्ठाश्रमं प्रति गन्तुम् उद्यता अभवत् ॥१५॥

शब्दार्थ—पल्लवरागाताम्रा = नवपल्लव के समान लाल । पतंगस्य = सूर्य की । प्रभा = कान्ति । मुनेः = वशिष्ठ की । धेनुः = गाय । दिगन्तराणि = दिशाओं को । सञ्चारपूतानि = अपने गमन से पवित्र । कृत्वा = करके । दिनान्ते = सन्ध्या के समय । निलयाय = स्थान अर्थात् अस्ताचल और आश्रम । गन्तुम् = जाने के लिये । प्रचक्रमे = प्रस्तुत हुए ॥१५॥

हिन्दी—पल्लवों की रक्तिमा के समान स्वल्प रक्तवर्ण वाली सूर्य की कान्ति और मुनि वशिष्ठ की धेनु नन्दिनी ने दिन भर दिशाओं के मध्य भाग को अपने विचरण से पवित्र कर सायंकाल स्वगृह अर्थात् वशिष्ठाश्रम को जाने के लिए उद्यत हुई ॥१५॥

समास—संचारपूतानि = संचारेण पूतानि (तृतीया तत्पुरुष) । दिगन्तराणि = दिशाम् अन्तराणि (षष्ठी तत्पुरुष) । पल्लवरागताम्रा = पल्लवस्य रागः (षष्ठीतत्पुरुष) पल्लवराग इव ताम्रा (उपमित समास) । दिनान्ते = दिनस्य अन्ते (षष्ठीतत्पुरुष) ॥१५॥

व्याकरण—संचार = सम् + चर् + घञ् । पूतानि = पू + क्त । कृत्वा = कृ + क्त्वा । गन्तुम् = गम् + तुमुन् । राग = रञ्ज + घञ् ॥१५॥

विशेष—प्रस्तुत श्लोक में वशिष्ठ की धेनु नन्दिनी का रंग लाल बताया गया है । कहा गया है कि अस्त होते हुए सूर्य की कान्ति कोपलों के रंग के

समान स्वल्प रक्त वर्ण की होती है तथा वशिष्ठ की धेनु का रंग भी ऐसा ही है। जिस प्रकार सायंकाल सूर्य की उपर्युक्त प्रभा अस्ताचल को जाती है उसी प्रकार शाम को नन्दिनी भी वशिष्ठाश्रम को चलने लगी।

उक्त श्लोक में सूर्यप्रभा और नन्दिनी दोनों का ही वर्णन है। दोनों के मध्य स्वनिलयगमनरूप एक क्रियारूप धर्म सम्बन्ध है अत: तुल्ययोगिता अलंकार है। साथ ही 'प्रतंगस्य प्रभा' तथा 'मुने: धेनु:' दोनों की एक ही क्रिया "गन्तुं प्रचक्रमे" कथन किये जाने के कारण दीपक अलंकार भी है। उपमा तो अपने स्वाभाविक रूप में ही है। पल्लवरागताम्रा में पल्लव उपमान, गाय उपमेय, रक्त वर्ण होना साधारण धर्म है। वाचक शब्द न होने के कारण वाचकलुप्ता उपमा है ॥१५॥

प्रसंग—सायंकाल होने पर नन्दिनी जब आश्रम को लौट रही थी और राजा उसके पीछे लौट रहे थे, उस समय का वर्णन करते हुए कहते हैं—

तां देवतापित्रतिथिक्रियार्थामन्वग्ययौ मध्यमलोकपाल:।
बभौ च सा तेन सतां मतेन श्रद्धेव साक्षात् विधिनोपपन्ना ॥१६॥

अन्वय—मध्यमलोकपाल: देवतापित्रतिथिक्रियार्थाम् ताम् अन्वग् ययौ। सतां मतेन तेन उपपन्ना सा विधिना साक्षात् श्रद्धा इव बभौ ॥१६॥

संस्कृतटीका—मध्यमलोकपाल:=पृथ्वीलोकरक्षक:, दिलीप:, देवतापित्र-तिथिक्रियार्थाम्=सुरपित्रभ्यागतार्थंप्रयोजनकाम्, ताम्=नन्दिनीम्, अन्वग् अनुपदं, ययौ=जगाम। सताम्=सज्जनानाम्, मतेन=सम्माननीयेन, तेन= राज्ञा दिलीपेन, उपपन्ना=युक्ता, सा=नन्दिनी, विधिना=धर्मानुष्ठानेन, साक्षात्=प्रत्यक्षभूता, श्रद्धा=भक्ति:, इव=यथा, बभौ=शुशुभे ॥१६॥

संस्कृतभावार्थ—पृथ्वीपालक: राजा दिलीप: यदा वशिष्ठाश्रमं प्रति निवर्तमानां देवपित्रतिथिकार्यसाधिकां नन्दिनीम् अनुययौ तदा सज्जनपुरुष-सम्माननीयेन तेन राज्ञादिलीपेन अनुगता सा धेनु: तथैव शोभिता यथा धर्मानुष्ठानेन संगता प्रत्यक्षश्रद्धा शोभते ॥१६॥

शब्दार्थ—मध्यमलोकपाल:=पृथ्वीपालक राजा दिलीप। देवतापित्रतिथि-क्रियार्थाम्=देवता पितर और अतिथियों के कार्य के लिए। अन्वक्=पीछे-पीछे। ययौ=चले। सतां मतेन=सज्जनों से पूजित। तेन=दिलीप ने।

विधिना=विधिपूर्वक धर्मानुष्ठान से। उपपन्न=युक्त। बभौ=सुशोभित हुई ॥१६॥

हिन्दी—पृथ्वीलोक का पालन करने वाले राजा दिलीप ने देवताओं, पितरों और अभ्यागतों के लिए किये जाने वाले यज्ञ आदि कार्यों को पूर्ण करने वाली उस नन्दिनी का अनुगमन किया। सज्जनों द्वारा सम्मानित राजा दिलीप से अनुगमन किये जाने पर वह नन्दिनी सज्जनों द्वारा अनुमोदित तथा शास्त्रानुष्ठान से युक्त साक्षात् श्रद्धा के समान शोभायमान हो रही थी ॥१६॥

समास—देवतापित्रतिथिक्रियार्थाम्=देवताश्च, पितरश्च अतिथयश्च (द्वन्द्वसमास) देवतापित्रतिथीनां क्रियाः (षष्ठीतत्पुरुष) देवतापित्रतिथिक्रियाः एव अर्थाः यस्याः सा ताम् (बहुव्रीहि)। मध्यमलोकपालः=मध्यमश्चासौ लोकः (कर्मधारय) मध्यमलोकस्य पालः (षष्ठी तत्पुरुष) ॥ १६ ॥

व्याकरण—अन्वग्=अनु+अञ्च्+क्विप्। ययौ=या+लिट् प्र० पु० ए० व०। बभौ=भा+लिट् प्र० पु० ए० व०। मतेन=मन्+क्त। उपपन्ना=उप+पद्+क्त+टाप्। ॥ १५ ॥

विशेष—नन्दिनी को गुरु वशिष्ठ के देवयज्ञ पितृयज्ञ और अतिथियज्ञ की क्रियाओं को पूर्ण करने वाली कहा गया है। जिस प्रकार श्रद्धा शास्त्रोक्त विधि-विधान से युक्त होने पर शोभा को प्राप्त होती है उसी प्रकार सज्जनों से सम्मानीय राजा के द्वारा अनुगमन किये जाने पर वह नन्दिनी शोभा को प्राप्त हो रही थी।

प्रस्तुत श्लोक में राजा और गाय उपमेय, विधि और श्रद्धा उपमान, "सतां मतेन" तथा 'बभौ' साधारण धर्म एवं 'इव' उपमा का वाचक होने से पूर्णोपमा अलंकार है ॥ १६ ॥

प्रसंग—राजा सायंकाल होने पर आश्रम को लौटती हुई गाय का अनुगमन कर रहा था उस समय के वन के दृश्य का वर्णन करते हुये महाकवि कहते हैं—

स पल्वलोत्तीर्णवराहयूथान्यावासवृक्षोन्मुखबर्हिणानि।
ययौ मृगाध्यासितशाद्वलानि श्यामायमानानि वनानि पश्यन् ॥१७॥

अन्वयः—(स) पल्वलोत्तीर्णवराहयूथानि आवासवृक्षोन्मुखबर्हिणानि मृगाध्यासितशाद्वलानि श्यामायमानानि वनानि पश्यन् ययौ ॥ १७ ॥

संस्कृत टीका—सः=राजादिलीपः, पल्वलोत्तीर्णवराहयूथानि=जलाशयनिर्गतशूकरसमूहानि, आवासवृक्षोन्मुखबर्हिणानि=निवासार्थपादपाभिमुखमयूरान्। मृगाध्यासितशाद्वलानि=हरिणाधिष्ठितसस्यश्यामलानि। श्यामायमानानि=कृष्णीभूतानि, वनानि=अरण्यानि, पश्यन्=विलोकयन्, ययौ=गतवान् ॥ १७ ॥

संस्कृत भावार्थ—सः दिलीपः लघुसरोवरेभ्यः अवगाह्य विनिर्गतानि शूकरसमूहानि निवासार्थं वृक्षाभिमुखमयूराणि मृगाधिष्ठितसस्यश्यामलानि अर्थात् श्यामायामानानि वनानि विलोकयन् गामनुजगाम ॥ १७ ॥

शब्दार्थ—पल्वलोतीर्णवराहयूथानि=छोटे-छोटे तालाबों से निकले हुए सुअरों के झुण्ड वाले। आवासवृक्षोन्मुखबर्हिणानि=निवास के वृक्षों की ओर मयूरों वाले। मृगाध्यासितशालद्वलानि=हरे घास युक्त स्थानों पर बैठे हुए मृग वाले। श्यामायमानानि=श्यामवर्ण। पश्यन्=देखते हुए। ययौ=चल। ॥ १७ ॥

हिन्दी—राजा दिलीप ने छोटे छोटे जलाशयों से शूकरों के झुण्ड बाहर निकल रहे थे, सायंकाल हो जाने से मयूर अपने निवास वृक्षों की ओर जा रहे थे, हरित प्रदेशों में जहाँ हिरण बैठे हुए थे, ऐसे वनों को देखते हुये नन्दिनी का अनुगमन किया। ॥ १७ ॥

समास—पल्वलोत्तीर्णवराहयूथानि=पल्वलेभ्यः उत्तीर्णानि वराहाणाम् यूथानि येषु तानि (बहुव्रीहि)। आवासवृक्षोन्मुखबर्हिणानि=आवासानां वृक्षा (षष्ठीतत्पुरुष) आवासवृक्षाणाम् उन्मुखाः बर्हिणाः येषु तानि (बहुव्रीहि)। मृगाध्यासितशाद्वलानि=मृगैः अध्यासिताः शाद्वलाः येषु तानि (बहुव्रीहि) ॥ १७ ॥

व्याकरण—उत्तीर्ण=उत+तृ+क्त। आवास=आ+वस्+घञ्। अध्यासित=अधि+आस्+णिच्+क्त। शाद्वल=शाद्+वलच्। श्यामायमान=श्याम+क्यच्+शानच्। पश्यन्=दृश्+शतृ। ययौ=या+लिट् प्र० पु० ए० वच० ॥ १७ ॥

विशेष—जब महाराज दिलीप सूर्यास्त के समय नन्दिनी के पीछे-पीछे आश्रम को लौट रहे थे उस समय सायंकाल हो जाने के कारण शूकर छोटे-छोटे तालाबों से अवगाहनकर बाहर निकल रहे थे, मयूर अपने निवासवृक्षों

को जा रहे थे, हरी-हरी घास वाले स्थानों पर हरिण बैठे हुये थे इस प्रकार राजा श्यामवर्ण वाले वनों को देख रहे थे । यहाँ कवि ने प्रकृति का सुन्दर चित्र उपस्थित-किया है । प्रस्तुत श्लोक में अनुप्रास अलंकार है । ॥ १७ ॥

प्रसंग—नन्दिनी एवं राजा दिलीप के आश्रम के प्रति प्रत्यावर्तन का वर्णन करते हुए कवि कहता है—

आपीनभारोद्वहनप्रयत्नाद्द गृष्टिर्गुरुत्वाद् वपुषो नरेन्द्रः ।
उभावलचञ्चक्रतुरञ्चिताभ्यां तपोवनावृत्तिपथं गताभ्याम् ॥१८॥

अन्वय—आपीनभारोद्वहनप्रयत्नाद् गृष्टिः वपुषः गुरुत्वात् नरेन्द्रः उभौ अञ्चिताभ्याम् गताभ्याम् तपोवनावृत्तिपथम् अलंचक्रतुः ॥ १८ ॥

संस्कृत टीका—आपीनभारोद्वहनप्रयत्नाद्=ऊधसः भारस्य वहनप्रयासात् । गृष्टिः=सकृत्प्रसूता गौः नन्दिनी, वपुषः=शरीरस्य, गुरुत्वात्=आधिक्यात्, नरेन्द्रः=राजा दिलीपः, उभौ च=गौः नरेन्द्रश्च, अञ्चिताभ्याम्=दर्शनीयाभ्याम्, तपोवनावृत्तिपथम्=तपोवनप्रत्यागमनमार्गम् । अलंचक्रतुः=भूषितवन्तौ ॥ १८ ॥

संस्कृतभावार्थः—सायंकाले तपोवनान्निवर्तमाना प्रथमप्रसूता नन्दिनी ऊधसः भारोद्वहनप्रयासात् मन्दगमना आसीत् । राजा दिलीपश्च स्वकीयशरीरस्य स्थौल्यकारणवशात् मन्दं मन्दमनुसरतिस्म । एवं तौ नन्दिनीदिलीपौ दर्शनीयगतिभ्यां तपोवनप्रत्यावर्तनमार्गं भूषितवन्तौ ॥ १८ ॥

शब्दार्थ—गृष्टिः=एकबार की व्याई हुई गाय । आपीनभारोद्वहनप्रयत्नात्=मोटे थनों के भार को वहन करने के प्रयास के कारण । वपुः=शरीर के गुरुत्वात्=भारी (स्थूल) होने के कारण । उभौ=राजा और गाय दोनों । अञ्चिताभ्याम्=सुन्दर । गताभ्याम्=गतियों से । तपोवनावृतिपथम्=तपोवन के लौटने के रास्ते को । अलञ्चक्रतुः=अलंकृत किया ॥ १८ ॥

हिन्दी—मोटे स्तनों के भार को वहन करने वाली प्रथमवार ही व्याई हुई नन्दिनी ने और अपने शरीर के विशाल होने के कारण राजा दिलीप इस प्रकार दोनों ने ही अपने मन्द-मन्द सुन्दर गमन के द्वारा तपोवन से लौटने के मार्ग को सुशोभित किया ॥ १८ ॥

समास—आपीनभारोद्वहनप्रयत्नात्=आपीनस्य भारस्य उद्वहनस्य प्रयत्नात् (षष्ठीतत्पुरुष)। तपोवनावृत्तिपथम्=तपोवनात् आवृत्तेः पन्थाः तम् (षष्ठीतत्पुरुष) नरेन्द्रः=नराणां इन्द्रः=(षष्ठीतत्पुरुष)॥ १८॥

व्याकरण—उद्वहन=उद्+वह्+ल्युट् (अन)। गुरुत्वात्=गुरु+त्व। अञ्चित=अञ्च्+क्तः। आवृत्ति=आ+वृत्+क्तिन्। अलंचक्रतुः=अलम्+कृ+लिट् प्र० पु० द्विवचन॥ १८॥

विशेष—संध्या समय तपोवन से लौटते हुए नन्दिनी एवं राजा दिलीप दोनों ही मन्द-मन्द गमन कर रहे थे। नन्दिनी का स्तन स्थूल था। अतएव वह उसके भार को वहन करने के प्रयत्न के कारण मन्द-मन्द गमन कर रही थी। राजा दिलीप शरीर की स्थूलता के कारण मन्द-मन्द चल रहे थे। अतः वे दोनों अपनी-अपनी मन्द-मन्द दर्शनीय चालों से तपोवन से लौटने के मार्ग को सुशोभित कर रहे थे।

प्रस्तुत श्लोक में प्राकृतिक दृश्य के साथ ही नन्दिनी के सुन्दर मन्द गमन का चित्र अनुप्रास अलंकार के माध्यम से खींचा गया है॥१८॥

प्रसंग—प्रस्तुत श्लोक में गोसेवापरायण राजा दिलीप का गाय का अनुगमन करते हुये आश्रम पर लौटना तथा सुदक्षिणा द्वारा स्वागत किया जाना वर्णित है—

वशिष्ठधेनोरनुयायिनं तमावर्तमानं वनिता वनान्तात्।
पपौ निमेषालसपक्ष्मपंक्तिरुपोषिताभ्यामिव लोचनाभ्याम्॥१९॥

अन्वय—वशिष्ठधेनोः अनुयायिनम् वनान्तात् आवर्तमानम् वनिता निमेषालसपक्ष्मपंक्तिः उपोषिताभ्याम् लोचनाभ्याम् इव पपौ॥१९॥

संस्कृत टीका—वशिष्ठधेनोः=गुरुधेनोः नन्दिन्याः। अनुयायिनम्=अनुगमनकर्तारम्, वनान्तात्=अरण्यप्रदेशात्, आवर्तमानम्=प्रत्यागतम्, तम्=राजानं दिलीपम्। वनिता=राज्ञी सुदक्षिणा, निमेषालसपक्ष्मपंक्तिः=निमीलनेषु मन्दनेत्रलोमराजिः। लोचनाभ्याम्=नेत्राभ्याम्, उपोषिताभ्याम्=अतितृषिताभ्याम्, इव=यथा। पपौ=अपिबत्॥१९॥

संस्कृत भावार्थ—सायंकाले नन्दिनीमनुसरन् राजा दिलीपः वनप्रदेशात् वशिष्ठाश्रमं प्रति आजगाम तदा राज्ञी सुदक्षिणा निर्निमेषेण दृशा तं सतृष्णं दृष्टवती। यथा कश्चित् उपोषितः जनः व्रतान्ते अधिकाधिकजलं पिबन्नपि

तृप्तो न भवति, तथैव महिषी सुदक्षिणा अपि स्वपतिं विलोकयन्ती तृप्तिं न भेजे ॥१६॥

शब्दार्थ—वसिष्ठधेनोः=वशिष्ठ के गाय के। अनुयायिनम्=पीछे-पीछे गमन करने वाले। वनान्तात्=वन के बीच से। आवर्तमानम्=लौटते हुए। तम्=राजा दिलीप को। वनिता=पत्नी सुदक्षिणा। निमेषालसपक्ष्मपंक्तिः=निर्निमेष दृष्टि से। उपोषिताभ्याम्=उपवास किये हुये। लोचनाभ्याम्=नेत्रों से। पपौ=पान किया ॥१६॥

हिन्दी—वशिष्ठ जी की गाय नन्दिनी का अनुगमन करने वाले और तपोवन से लौटे हुए महाराज दिलीप को रानी सुदक्षिणा ने अपलक नेत्र होकर उपवास किये हुए के समान सतृष्ण दृष्टि से देखा ॥१६॥

समास—निमेषालसपक्ष्मपंक्तिः=निमेषेषु अलसा पक्ष्मणां पंक्तिः यस्याः सा (बहुव्रीहि) ॥१६॥

व्याकरण—अनुयायिनम्=अनु+या+णिनि। आवर्तमानम्=आ+वृत्+शानच्। निमेष=नि+मिष्+घञ्। पंक्ति=पञ्च्+ति। उपोषितः=उप+वस्+क्त। लोच्+ल्युट् (अन) ॥१६॥

विशेष—सायंकाल महाराज दिलीप जब गाय के साथ वन से लौटे तब सुदक्षिणा ने उनको निर्निमेष दृष्टि से देखा। कवि ने उत्प्रेक्षा की है कि नेत्र मानो उपवास किये हुये थे। जिस प्रकार उपवास करने वाला व्यक्ति जल को विशेष रुचि से पीता है। फिर भी तृप्त नहीं होता, उसी प्रकार सुदक्षिणा ने भी दिन भर दिलीप को नहीं देखा था मानो उसके नेत्र दिन भर उपवास करते रहे और सायंकाल जब राजा दिलीप लौटे तो राजा को सतृष्ण नेत्रों से देखते अघाई नहीं ॥१६॥

प्रसंग—रानी सुदक्षिणा के राजा के स्वागत के पश्चात् नन्दिनी और राजा दिलीप के बीच में स्थित नन्दिनी की शोभा का वर्णन करते हुए कहते हैं—

पुरस्कृता वर्त्मनि पार्थिवेन प्रत्युद्गता पार्थिवधर्मपत्न्या।
तदन्तरे सा विरराज धेनुर्दिनक्षपामध्यगतेव सन्ध्या ॥२०॥

अन्वय—वर्त्मनि पार्थिवेन पुरस्कृता पार्थिवधर्मपत्न्या प्रत्युद्गता सा धेनुः तदन्तरे दिनक्षपामध्यगता सन्ध्या इव विरराज ॥२०॥

संस्कृतटीका—वर्त्मनि=मार्गे, पार्थिवेन=राज्ञा दिलीपेन, पुरस्कृता=अग्रतःकृता। पार्थिवधर्मपत्न्या=राज्ञःदिलीपस्य भार्यया सुदक्षिणया, प्रत्युद्गता=स्वागतार्थं प्रत्युद्गम्य आदृता, सा धेनुः=नन्दिनी, तदन्तरे=सुदक्षिणा-दिलीपयोर्मध्ये, दिनक्षपामध्यगता=दिनरात्रिमध्यप्राप्ता। सन्ध्या=सायंकाल, इव=यथा। विरराज=शोभितवती ॥२०॥

संस्कृत भावार्थ—तपोवनात्प्रत्यावर्तमाना नन्दिनी राज्ञा दिलीपेन अग्रतः कृता आसीत् राज्ञः पत्नी सुदक्षिणा च स्वागतार्थं प्रत्युद्गता आसीत्। एवं तयोः मध्ये सा धेनुः एवम् विरराज, यथा दिनरात्रिमध्यगता सन्ध्या शोभते ॥२०॥

शब्दार्थ—वर्त्मनि=रास्ते में। पार्थिवेन=राजा के द्वारा। पुरस्कृता=आगे की गयी। पार्थिवधर्मपत्न्या=राजा की पत्नी सुदक्षिणा के द्वारा। प्रत्युद्गता=अगवानी की गयी। सा धेनुः=वह नन्दिनी गाय। तदन्तरे=राजा और रानी के बीच में। दिनक्षपामध्यगता=दिन और रात के बीच में। विरराज=सुशोभित हुई ॥२०॥

हिन्दी—तपोवन से लौटने के रास्ते में नन्दिनी राजा के द्वारा आगे की गई और रानी सुदक्षिणा के द्वारा स्वागतार्थ अगवानी की गई वह उन दोनों के मध्य दिन और रात्रि के मध्य सन्ध्या के समान सुशोभित हुई ॥२०॥

समास—पार्थिवधर्मपत्न्या=पार्थिवस्य धर्मपत्नी तया (षष्ठीतत्पुरुष)। दिनक्षपामध्यगता=दिनं च क्षपा च (द्वन्द्व) तयोः मध्यगता (षष्ठीतत्पुरुष) तदन्तरे=तयोः अन्तरे (सप्तमी तत्पुरुष) ॥२०॥

व्याकरण—पुरस्कृता=पुरस्+कृ+क्त+टाप्। वर्त्मनि=वृत्+मनिन्। पार्थिवः=पृथिवी+अण्। प्रत्युद्गता=प्रति+उद्+गम्+क्त+टाप्। विरराज=वि+राज्+लिट् प्र० पु० ए० वच० ॥२०॥

विशेष—वन से लौटते हुये राजा के आगे नन्दिनी थी और रानी सुदक्षिणा द्वारा अगवानी की जा रही थी इस प्रकार दोनों के मध्य लालरंग वाली नन्दिनी ऐसी शोभा पा रही थी मानो दिन और रात्रि के मध्य सन्ध्या हो।

प्रस्तुत श्लोक में उपमालंकार में लिंग व वर्ण साम्य स्थापित किया गया है। राजा को दिन के समान कान्ति वाला तथा रानी को रात्रि की समान कान्ति वाली कहा गया है। राजा को पुंल्लिग से और रानी को स्त्रीलिंग से

साम्य स्थापित किया है। नन्दिनी को भी स्त्रीलिंग लालसन्ध्या के समान कहा गया है ॥२०॥

प्रसंग—तपोवन से लौटने वाले राजा एवं नन्दिनी का स्वागत कर सुदक्षिणा द्वारा नन्दिनी की पूजा का वर्णन करते हुए कहते हैं—

प्रदक्षिणीकृत्य पयस्विनीं ताम् सुदक्षिणा साक्षतपात्रहस्ता ।
प्रणम्य चानर्च विशालमस्याः श्रृंगान्तरं द्वारमिवार्थसिद्धेः ॥२१॥

अन्वय—साक्षतपात्रहस्ता सुदक्षिणा पयस्विनीम् ताम् प्रदक्षिणीकृत्य प्रणम्य च अर्थसिद्धेः द्वारम् इव अस्याः विशालम् श्रृंगान्तरम् आनर्च ॥२१॥

संस्कृत टीका—साक्षतपात्रहस्ता=अक्षतपात्रं हस्ते गृहीत्वा, सुदक्षिणा=राज्ञःदिलीपस्य धर्मपत्नी । पयस्विनीम्=उत्तमदुग्धाम्, ताम्=नन्दिनीम्, प्रदक्षिणीकृत्य=परिक्रम्य, प्रणम्य च=नमस्कृत्य, च, अस्याः=नन्दिन्याः । विशालम्=विस्तीर्णम् । श्रृंगान्तरम्=विषाणमध्यम्, । अर्थसिद्धेः=सन्ततिप्राप्तिरूपप्रयोजनपूर्तेः । द्वारम्=कारणम्, इव=यथा, आनर्च=पूजयामास ॥२१॥

संस्कृत भावार्थ—राज्ञा दिलीपेन युक्ता नन्दिनी तपोवनात् यदा वशिष्ठाश्रमं प्रत्यागता तदा सुदक्षिणा अक्षतयुक्तं पात्रं हस्तयोर्गृहीत्वा उत्तमदुग्धप्रदायिनीम् तां प्रदक्षिणीकृत्य तथा प्रणम्य च तस्याः विस्तृतं श्रृंगयोर्मध्यभागं स्वसन्तानप्राप्तिरूपकार्यसिद्धेः द्वारम् इव पूजयामास ॥२१॥

शब्दार्थ—साक्षतपात्रहस्ता=चावलयुक्त पात्र हाथ में ली हुई । पयस्विनीम्=प्रशस्त दूध देने वाली । प्रदक्षिणीकृत्य=परिक्रमा करके । प्रणम्य=प्रणाम करके । अर्थसिद्धेः=कार्यसिद्धि के । द्वारमिव=प्रवेश द्वार के समान । शृंगान्तरम्=सीगों के बीच मस्तक की । आनर्च=पूजा की ॥२१॥

हिन्दी—अक्षत युक्त पात्र को हाथ में ग्रहण किये हुये रानी सुदक्षिणा ने उत्तम दुग्ध देने वाली उस नन्दिनी की परिक्रमा की और प्रणाम करके पुनः नन्दिनी के विशाल सीगों के मध्य भाग को अपने लिये पुत्रप्राप्ति का द्वार मान कर पूजन किया ॥२१॥

समास—श्रृंगान्तरम्=श्रृंगयोः अन्तरम् (षष्ठीतत्पुरुष) । अर्थसिद्धेः=अर्थस्य सिद्धेः (षष्ठीतत्पुरुष) । साक्षतपात्रहस्ता=अक्षतैः सह (अव्ययीभाव) साक्षतं पात्रं हस्ते यस्या सः (वहुव्रीहि) ॥२१॥

व्याकरण=प्रदक्षिणीकृत्य=प्रदक्षिणा+च्वि+कृ+क्त्वा (ल्यप्)। पयस्विनीम्=पयस्+विनि+ङीप्। प्रणम्य=प्र+नम्+क्त्वा (ल्यप्)। आनर्च=अर्च्+लिट्—प्र० पु० ए० वच० ॥२१॥

विशेष—तपोवन से नन्दिनी के वापिस आने पर सुदक्षिणा ने उस गाय की परिक्रमा तथा नमस्कार किया। तदुपरान्त उसके विशाल शृंगों के मध्य भाग अर्थात् मस्तक को यह मानकर पूजा की मानो यही उसकी सन्तान-प्राप्ति का मुख्य हेतु है।

प्रस्तुत श्लोक में सुदक्षिणा ने नन्दिनी के मस्तक की पूजा की जो कि मानो उसकी सन्तान प्राप्ति का कारण था। इस प्रकार ऋगान्तर में अर्थसिद्धि के द्वार की सम्भावना करने के कारण उत्प्रेक्षा अलंकार है ॥२१॥

प्रसंग—रानी सुदक्षिणा के उस नन्दिनी का पूजन करने के पश्चात् नन्दिनी के द्वारा पूजा को स्वीकार किये जाने का वर्णन करते हुए कहते हैं—

वत्सोत्सुकापि स्तिमिता सपर्यां प्रत्यगृहीत्सेति ननन्दतुस्तौ।
भक्त्योपपन्नेषु हि तद्विधानां प्रसादचिह्नानि पुरःफलानि ॥२२॥

अन्वयः—सा वत्सोत्सुका अपि स्तिमिता सती सपर्यां प्रत्यग्रहीत् इति तौ ननन्दतुः। हि भक्त्या उपपन्नेषु तद्विधानां प्रसादचिन्हानि पुरःफलानि ॥२२॥

वत्सोत्सुका अपि सा
सपर्या
स्वामि
सती
प्रत्यगृहीत्

संस्कृत टीका—सा=नन्दिनी। वत्सोत्सुकापि=वत्सोकण्ठितापि। स्तिमिता=निश्चला सती, सपर्या=पूजा, प्रत्यग्रहीत्=स्वीचकार। इति=अस्माद्धेतोः। तौ=सुदक्षिणादिलीपौ, ननन्दतुः=प्रसन्नौ बभूवतुः। हि=यतः भक्त्या=श्रद्धया, उपपन्नेषु=अनुरागयुक्तेषु, तद्विधानाम्=नन्दिनीसदृशानाम् प्रसादचिन्हानि=प्रसन्नतालक्षणानि, पुरःफलानि=अविलम्ब एव भक्तेभ्य शुभफलप्रदायकानिसन्ति ॥२२॥

संस्कृत भावार्थ—तपोवनात् प्रत्यागता वशिष्ठधेनुः यद्यपि स्वार्भकस्य कृते दर्शनोत्सुका आसीत् तथापि सुदक्षिणया कृता पूजा तया आनन्देन स्वीकृता। पूजां गृहीतायाम् सत्याम् सुदक्षिणादिलीपौ परमानन्दमयौ जातौ। पूजनीयेषु अनुरागयुक्तेषु जनेषु नन्दिनीसदृशानाम् प्रसन्नतायाः लक्षणानि अविलम्बसन्ततिरूपाभीष्टफलप्रदायकानि सन्ति ॥२२॥

शब्दार्थ—वत्सोत्सुकापि=बछड़े के लिए उत्सुक। स्तिमिता=निश्चल।

सपर्याम्=पूजा को। प्रत्यग्रहीत्=स्वीकार किया। ननन्दतुः=प्रसन्न हुए। भक्त्या=श्रद्धा से। उपपन्नेषु=युक्त। तद्विधानाम्=उस प्रकार के। प्रसाद-चिन्हानि=प्रसन्नता के चिह्न। पुरःफलानि=शीघ्र फल देने वाले हैं ॥२२॥

हिन्दी—बछड़े के लिये विशेष उत्कण्ठित होते हुए भी उस नन्दिनी ने रानी सुदक्षिणा की पूजा को शान्त एवं निश्चल भाव से स्वीकार किया। पूजा को ग्रहण करने के कारण राजा रानी दोनों प्रसन्न हुए। क्योंकि पूजनीयों के प्रति अनुरागपूर्ण जनों के विषय में नन्दिनी सदृश महात्माओं के प्रसन्नता के लक्षण शीघ्र ही सन्तानरूप फलप्राप्ति के सूचक होते हैं ॥२२॥

समास—वत्सोत्सुका=वत्से उत्सुका: (सप्तमीतत्पुरुष)। प्रसादचिन्हानि=प्रसादस्य चिन्हानि (षष्ठीतत्पुरुष)। पुरःफलानि=पुरोगतानि फलानि येषां तानि (बहुव्रीहि) ॥२२॥

व्याकरण—भक्त्या=भज्+क्तिन्। उपपन्न=उप+पद्+क्त। प्रसाद=प्र+सद्+घञ्। प्रत्यग्रहीत्=प्रति+ग्रह्+लुङ् प्र० पु० ए० वच०। ननन्दतुः=नन्द्+लिट् प्र० पु० द्वि० वच० ॥२२॥

विशेष—दिन भर तपोवन में रहने के पश्चात् घर को लौटने वाली नन्दिनी यद्यपि अपने बछड़े के लिये विशेष उत्कण्ठित थी। परन्तु उसने रानी सुदक्षिणा की पूजा को निश्चल भाव से स्वीकार किया। नन्दिनी द्वारा पूजा को शान्त भाव से स्वीकार कर लेने पर राजा रानी अत्यधिक प्रसन्न हुए क्योंकि राजा रानी ने यह समझ लिया कि नन्दिनी शीघ्र ही प्रसन्न होकर हमको पुत्र रूप वर प्रदान करेगी। यह भी एक तथ्य है कि कोई महान् विभूति यदि शीघ्र ही प्रजा को स्वीकार करे तो शीघ्र ही कल्याण होगा। अतः अपने से महान् में श्रद्धा रखना कल्याणकारी है।

प्रस्तुत श्लोक में भक्ति से प्रसन्न होने वाली नन्दिनी की कृपा शीघ्र ही सन्तानरूप फल की देने वाली होगी इस विशेष का समर्थन नन्दिनी जैसी महान् विभूतियों की कृपा शीघ्र ही मनोरथों को पूर्ण करती है इस सामान्य के द्वारा किये जाने के कारण "अर्थान्तरन्यास" अलंकार है ॥२२॥

प्रसंग—प्रस्तुत श्लोक में नन्दिनी की सेवा करने के पश्चात् सान्ध्यविधि एवं गुरु की सुश्रूषा के बाद पुनः नन्दिनी की सेवा का वर्णन करते हुए कहते हैं—

गुरोः सदारस्य निपीड्य पादौ समाप्य सान्ध्यं च विधिं दिलीपः ।
दोहावसाने पुनरेव दोग्ध्रीं भेजे भुजोच्छिन्नरिपुर्निषण्णाम् ॥२३॥

अन्वय—भुजोच्छिन्नरिपुः दिलीपः सदारस्य गुरोः पादौ निपीड्य सान्ध्यम् विधिं च समाप्य दोहावसाने निषण्णाम् दोग्ध्रीम् पुनः एव भेजे ॥२३॥

संस्कृतटीका—भुजोच्छिन्नरिपुः=बाहुभ्यां विनाशितशत्रुः, दिलीपः= पृथिवीपतिः । सदारस्य=भार्यासहितस्य, गुरोः=वशिष्ठस्य, पादौ=चरणौ, निपीड्य=सम्मर्द्य, सान्ध्यम्=सायकालिकम्, विधिम्=क्रियाम्, च, समाप्य= पूर्णं कृत्वा, दोहावसाने=दुग्धदोहनान्ते, निषण्णाम्=उपविष्टाम्, दोग्ध्रीम्= दोनशीलाम् नन्दिनीम्, पुनः=एव, भेजे=सेवितवान् ॥२३॥

संस्कृतभावार्थ—बाहुबलेन नाशितशत्रुसमूहः राजादिलीपः भार्ययायुक्तस्य- गुरोः वशिष्ठस्य पादौ निपीड्य, तत्पश्चात् स्वकीयंशास्त्रोदितं सायकालिकं कृत्यं दोहनक्रियायाः समाप्त्यनन्तरं सुखोपविष्टां तां नन्दिनीं पुनः सेवितवान् ॥ २३ ॥

शब्दार्थ—भुजोच्छिन्नरिपुः=भुजाओं से शत्रुओं का संहार करने वाले । सदारस्य=स्त्री के साथ । गुरोः=वसिष्ठ के । पादौ निपीड्य=चरणों को दबाकर अर्थात् चरण छूकर । सान्ध्य विधिम्=सायंकालीन विधि को । समाप्य=समाप्त करके । दोहावसाने=दुह लेने के बाद । निषण्णाम्=बैठी हुई । दोग्ध्रीम्=दूध देने वाली नन्दिनी को । भेजे=सेवा की ॥२३॥

हिन्दी—अपनी बाहुओं से शत्रुओं का नाश करने वाले राजा दिलीप ने पत्नी सहित गुरु वशिष्ठ के चरणों को दबाकर तत्पश्चात् अपने सन्ध्यावन्दनादि क्रियाओं को समाप्त कर दूध दुहने के पश्चात् सुखपूर्वक बैठी हुई अत्यधिक दूध देने वाली उस नन्दिनी की पुनः सेवा की ॥२३॥

समास—दोहावसाने=दोहस्य अवसाने (षष्ठीतत्पुरुष) । भुजोच्छिन्नरिपुः= भुजाभ्यां उच्छिन्ना रिपवः येन स (बहुव्रीहि) ॥३२॥

व्याकरण—निपीड्य=नि+पीड्+क्त्वा (ल्यप् । समाप्य=सम्+ आप्+क्त्वा+ल्यप् । विधिम्+वि+धा+कि । अवसान=अव+सो+ल्युट् (अन) । निषण्णाम्=नि+षद्+क्त+टाप् । भेजे=भज्+लिट् प्र० पु० ए० व० ॥२३॥

विशेष—गाय की सेवा करने के पश्चात् राजा दिलीप ने गुरु एव गुरु पत्नी के चरणों को दबाया। उसके बाद सन्ध्यावन्दनादि अपने नित्य कृत्यों को किया। तदन्तर दुहने के पश्चात् बैठी हुई उस नन्दिनी की पुनः सेवा प्रारम्भ करदी। राजा किसी अन्य कार्य में नहीं लगे क्योंकि उस समय उन्हें केवल गोसेवा ही अच्छी लगती थी अन्य कार्यों से चित्त को उन्होंने हटा लिया था ॥२३॥

प्रसंग—राजा दिलीप गाय की सेवा में तत्पर हो गये इसका वर्णन करते हुए कवि कहता है—

तामन्तिकन्यस्तवलिप्रदीपामन्वास्य गोप्ता गृहिणीसहायः ।
क्रमेण सुप्तामनुसंविवेश सुप्तोत्थितां प्रातरनूदतिष्ठत् ॥२४॥

अन्वय—गृहिणीसहायः गोप्ता अन्तिकन्यस्तवलिप्रदीपाम् ताम् अन्वास्य क्रमेण सुप्ताम् अनुसंविवेश, प्रातः सुप्तोत्थिताम् अनु उदतिष्ठत् ॥२४॥

संस्कृतटीका—गृहिणीसहायः=सपत्नीकः, गोप्ता=रक्षकः, अन्तिकन्यस्तवलिप्रदीपाम्=समीपस्थापितपूजादीपाम्, ताम्=नन्दिनीम् अन्वास्य=पश्चादुपविश्य, क्रमेण=अनुक्रमेण, सुप्ताम्=निद्रिताम्, अनु=पश्चात्, संविवेश=सुष्वाप, प्रातः=प्रभातकाले, सुप्तोत्थिाम्=शमितविनिद्रिताम्, अनु=पश्चात्, उदतिष्ठत्=उत्थितवान् ॥२४॥

संस्कृतभावार्थ—सुदक्षिणया सह राजा दिलीपः नन्दिन्या समीपे पूजासामग्रीस्वरूपदीपकं संस्थाप्य उपविष्टवान् । तत्पश्चात् नन्दिनींसुप्तायां राजाऽपि शयनं कृतवान् । प्रातःकाले नन्दिनी यदा सुप्त्वा उत्थितवती तदा दिलीपोऽपि उत्थितवान् । एवं राज्ञा तस्या सेवा कृता ॥२४॥

शब्दार्थ—गृहिणीमहायः=पत्नी के साथ। अन्वास्य=पीछे बैठ करके। सुप्ताम्=सो जाने पर। अनुसंविवेश=पीछे सोये। सुप्तोत्थिताम्=सोकर उठने के बाद ॥२४॥

हिन्दी—रानी सुदक्षिणा सहित प्रजारक्षक राजा दिलीप नन्दिनी के पास पूजा सामग्री दीपकादि को रख कर बैठ गये। गाय के सोने पर राजा सोये और प्रातःकाल गाय के जागने पर राजा जागे ॥२४॥

समास— अन्तिकन्यस्तबलिप्रदीपाम् = अन्तिके न्यस्ताः बलिप्रदीपाः यस्याः सा ताम् (बहुव्रीहि) गृहिणीसहायः = गृहिणी सहायः यस्य सः (बहुव्रीहि) ॥२४॥

व्याकरण—न्यस्त = नि + अस् + क्त । अन्वास्य = अनु + आस् + क्त्वा । (ल्यप्) । गोप्ता = गुप् + तृच् । सुप्ताम् = स्वप् + क्त + टाप् । उत्थिता = उद् + स्था + क्त + टाप् । संविवेश = सम् + विश् + लिट् प्र० पु० ए० वच० । उदतिष्ठत् = उद् + स्था + लङ् प्र० पु० ए० व० । ॥२४॥

विशेष— पत्नी के साथ राजा दिलीप ने गाय की सेवा की। वे गाय के पास पूजन की सामग्री तथा दीपक आदि रखकर स्वयम् उसके पास बैठ गये और गाय के सो जाने पर वे सो गये और जब वह सोकर उठी तब वे भी जाग गये। प्रस्तुत श्लोक में राजा द्वारा गाय की सेवा का वर्णन किया गया है ॥२४॥

प्रसंग—रानी सुदक्षिणा के साथ राजा दिलीप को उक्त प्रकार से सेवा करते हुए इक्कीस दिन व्यतीत हो गये इसका वर्णन करते हुए कहते हैं—

इत्थं व्रतं धारयतः प्रजार्थं समं महिष्या महनीयकीर्तेः ।
सप्त व्यतीयुस्त्रिगुणानि तस्य दिनानि दीनोद्धरणोचितस्य ॥२५॥

अन्वयः—महिष्या समम् प्रजार्थम इत्थम् व्रतम् धारयतः महनीयकीर्तेः दीनोद्धरणोंचितस्य तस्य त्रिगुणानि सप्त दिनानि व्यतीयुः ॥२२॥

संस्कृतटीका—महिष्या = सुदक्षिणया, समम् = सह, प्रजार्थम् = सन्तानाय, इत्थम् = अनेन प्रकारेण, व्रतम् = नियमम्, धारयतः = आचरतः, महनीयकीर्तेः = अर्हणीयग्रयशसः, दीनोद्धरणोचितस्य = पीडितजनरक्षणतत्परस्य, तस्य = राज्ञः-दिलीपस्य, त्रिगुणानि = त्रिरावृत्तानि, सप्त = सप्तसंख्यकानि, दिनानि = दिवसानि, व्यतीयुः = व्यतीतानि ॥२५॥

संस्कृत भावार्थ—सुदक्षिणया साकं सन्तानप्राप्तये अनेन प्रकारेण व्रतमाचरतः सम्माननीयशसः पीडितजनरक्षणतत्परस्य तस्य राज्ञः दिलीपस्य एकविंशतिदिनानि व्यतीतानि ॥२५॥

शब्दार्थ—महिष्या समम् = रानी के साथ। प्रजार्थम् = सन्तान के लिए। महनीयकीर्त्तेः = महाकीर्तिशाली। दीनोद्धरणोचितस्य = दीनों के उद्धार करने में

रत । तस्य=राजा के । त्रिगुणानि सप्त=इक्कीस । व्यतीयुः=बीत गये ॥२५॥

हिन्दी—रानी सुदक्षिणा के साथ सन्तान प्राप्ति के लिये इस प्रकार व्रत को धारण किये हुये प्रशंसनीय यश वाले तथा दीनों का उद्धार करने में चित्त को लगाने वाले उस राजा दिलीप को गाय की सेवा करते हुये इक्कीस दिन व्यतीत हो गये ॥२५॥

समास—महनीयकीर्तेः=महनीया कीर्तिः यस्य सः तस्य (बहुव्रीहि) । दीनोद्धरणोचितस्य दीनानाम् उद्धरणे उचितस्य (तत्पुरुष.) । त्रिगुणानि=त्रयः गुणाः येषाम् तानि (बहुव्रीहि) ।

व्याकरण—इत्थम्=इदम्+थमु । व्रतम्=वृ+अतच् । धारयतः=धृ+णिच्+शतृ । उद्धरण=उत्+हृ+ल्युट् (अन) । व्यतीयुः=वि+अति+इ+लिट् प्र० पु० वहुवच० ॥२५॥

विशेष=परमयशस्वी तथा दीनों का उद्धार करने में समर्थ राजा दिलीप को गाय की सेवा करते हुये इक्कीस दिन बीत गये ॥२५॥

प्रसंग—इसके बाद बाइसवें दिन राजा दिलीप की परीक्षा लेने के निमित्त उपाक्रम करती हुई नन्दिनी का वर्णन करते हुए महाकवि कहते हैं—

अन्येद्युरात्मानुचरस्य भावं जिज्ञासमाना मुनिहोमधेनुः ।
गङ्गाप्रपातान्तविरूढशष्पं गौरीगुरोर्गह्वरमाविवेश ॥२६॥

अन्वय—अन्येद्युः मुनिहोमधेनुः आत्मानुचरस्य भावम् जिज्ञासमाना गंगाप्रपातान्तविरुढशपम् गौरीगुरोः गह्वरम् आविवेश ॥२६॥

संस्कृत टीका—अन्येद्युः=अन्यस्मिन् दिने, **मुनिहोमधेनुः**=वशिष्ठस्य होमसाधनभूता गौः, आत्मानुचरस्य=स्वसेवकस्य, भावम्=अभिप्रायम्, जिज्ञासमाना=ज्ञातुमिच्छन्ती, गंगाप्रपान्तविरूढशष्पम्=भागीरथीप्रपान्ते समुत्पन्नघासम्, गौरीगुरोः=पर्वत्याः, जनकस्य=हिमालयस्य, गह्वरम्=गुहाम्, आविवेश=प्रविष्टा अभवत् ॥२६॥

संस्कृत भावार्थ—द्वाविंशतितमे दिवसे नन्दिनी राज्ञः दिलीपस्य सेवाभावं जिज्ञासमाना गंगायाः प्रवाहसमीपे समुत्पन्नघासयुतां हिमालस्य कन्दरां प्राविशत् ॥२६॥

शब्दार्थ—अन्येद्युः=दूसरे दिन। मुनिहोमधेनुः=मुनि वसिष्ठ की गाय नन्दिनी। आत्मानुचरस्य=अपने अनुचर दिलीप के। भावम्=अभिप्राय को। जिज्ञासमाना=जानने की इच्छा रखती हुई। गङ्गाप्रपातान्तविरूढशष्पम्=गङ्गा के प्रपात के समीप उगी हुई छोटी-छोटी घासों से युक्त। गौरीगुरोः=हिमालय पर्वत को। गह्वरम्=गुफा में। आविवेश=प्रवेश कर गई ॥२६॥

हिन्दी—बाइसवें दिन वशिष्ठ के यज्ञादि कार्यों को सम्पादन करने वाली नन्दिनी राजा दिलीप के सेवाभाव को जानने की इच्छा से गङ्गा के प्रवाह के समीप उगी हुई घास युक्त हिमालय की गुफा में प्रविष्ट हो गई ॥२६॥

विशेष—राजा को जब नन्दिनी की सेवा करते हुए इक्कीस दिन बीत गये तब बाइसवें दिन राजा की सेवाभाव की परीक्षा लेने के विचार से नन्दिनी हिमालय पर्वत की गुफा में प्रवेश कर गई। प्रस्तुत श्लोक में अनुप्रास अलंकार है ॥२६॥

समास—मुनिहोमधेनुः=मुनेः होमस्य धेनुः (षष्ठीतत्पुरुष)। आत्मानुचरस्य=आत्मनः अनुचरस्य (षष्ठीतत्पुरुष)। गङ्गाप्रपातान्तविरूढशष्पम्==गङ्गायाः प्रपातान्तस्य अन्ते विरूढानि शष्पाणि यत्र तत् (बहुव्रीहि)। गौरीगुरोः=गौर्याः गुरोः (षष्ठीतत्पुरुष) ॥२६॥

व्याकरण—अन्य+एद्युस्। अनुचर=अनु+चर्+ट प्रत्यय। भावम्=भू+घञ्। जिज्ञासमाना=ज्ञा+सन्+शानच्+टाप्। प्रपात=प्र+पत्+घञ्। गह्वरम्=गह्+वरच्। आविवेश=आ+विश्+लिट् प्र० पु० एकवचन ॥२६॥

प्रसंग—इसके बाद नन्दिनी के गुफा में प्रवेश करने पर एक सिंह ने उस पर आक्रमण किया इसका वर्णन करते हुए महाकवि कहते हैं—

सा दुष्प्रधर्षा मनसापि हिंस्रैरित्यद्रिशोभाप्रहितेक्षणेन।
अलक्षिताभ्युत्पतनो नृपेण प्रसह्य सिंहः किल तां चकर्ष ॥२७॥

अन्वय—सा हिंस्रैः मनसापि दुष्प्रधर्षा इति अद्रिशोभाप्रहितेक्षणेन नृपेण अलक्षिताभ्युत्पतनः सिंहः ताम् प्रसह्य चकर्ष किल ॥२७॥

संस्कृत टीका—सा=नन्दिनी। हिंस्रैः=वनजन्तुभिः। मनसापि=चित्तेनापि। दुष्प्रधर्षा=आक्रमितुमशक्या। इति=अस्मात् करणात्। अद्रि-

शोभाप्रहितेक्षणेन = पर्वतसौन्दर्यदत्तदृष्टिना । नृपेण = राज्ञा दिलीपेन । अलक्षिताभ्युत्पतनः = अदृष्टाभिमुखाक्रमणः । सिंहः = मृगराजः । ताम् = नन्दिनीम् । प्रसह्य = हठात् । चकर्ष = आकृष्टवान् । किल = निश्चयेन ॥२७॥

संस्कृत भावार्थ— नन्दिनी हिंसकजन्तुभिः मनसापि दुर्दमनीया इति चित्ते निश्चित्य राजा दिलीपः हिमालयपर्वतसौन्दर्यं विलोकयितुं तत्परोऽभवत् पर्वतशोभायां दत्तदृष्टिः राजा दिलीपः सिंहे नाक्रान्तां नन्दिनीमवलोकितवान् ॥

शब्दार्थ— हिंस्रैः = हिंसक पशुओं से । मनसा = मन से । दुष्प्रधर्षा = कठिनता से दमन के योग्य । आद्रिशोभाप्रहितेक्षणेन = पर्वत की शोभा देखने में दृष्टि लगाये हुए । अलक्षिताभ्युत्पतनः = जिसका आक्रमण देखा नहीं गया । प्रसह्य = बलपूर्वक । चकर्ष = आक्रमण किया ॥२७॥

हिन्दी— नन्दिनी जंगली हिंसक सिंहादि के द्वारा अनतिक्रमणीय है यह विचारकर राजा दिलीप ने पर्वत की शोभा देखने में दृष्टि को लगाये हुए जिसका सामने आक्रमण नही देखा जा सका, ऐसे सिंह ने बलपूर्वक नन्दिनी पर आक्रमण किया ॥२७॥

विशेष— पर्वत की गुफा में नन्दिनी के प्रवेश करने पर राजा ने विचार किया कि नन्दिनी पर कोई भी हिंसक जन्तु आक्रमण करने की बात सोच भी नहीं सकता । यह विचार कर निश्चिन्त होकर वह पर्वत की शोभा को देखने लगा । तभी सिंह ने नन्दिनी पर आक्रमण किया और उसको बलपूर्वक मारने के लिए खींचने लगा । राजा पर्वत की शोभा को देखने में इतना व्यस्त रहा कि वह सिंह के आक्रमण को नहीं देख पाया ॥२७॥

समास— अद्रिशोभाप्रहितेक्षणेन = अद्रेः शोभायां प्रहिते ईक्षणे येनतत्तेन (बहुव्रीहि) । अलक्षिताभ्युत्पतनः = न लक्षितम् अलक्षितम्, अलक्षितम अभ्युत्पतनं यस्य सः (बहुव्रीहिः) ॥(२७)॥

व्याकरण— दुष्प्रधर्षा = दुष् + प्र + धृष् + खल् + टाप् । हिंस्रैः = हिंस् + रक्) । प्रहितः = प्र + धा + क्त । लक्षित = लक्ष् + क्त) अभ्युत्पतनः = अभि + उत् + पत् + ल्युट् (अन) । प्रसह्य = प्र + सह् + क्त्वा (ल्यप्) चकर्ष = कृष् + लिट् प्र० पु० ए० व० ॥२७॥

प्रसंग—इसके बाद नन्दिनी के उस सिंह से आक्रान्त होने पर उसके आर्तनाद से राजा का ध्यान उस ओर आकृष्ट हो गया—

तदीयमाक्रन्दितमार्त्तसाधोर्गुहानिबद्धप्रतिशब्ददीर्घम् ।
रश्मिष्विवादाय नगेन्द्रसक्तां निवर्त्तयामास नृपस्य दृष्टिम् ॥२८॥

अन्वय—गुहानिबद्धप्रतिशब्ददीर्घम् तदीयम् आक्रन्दितम् आर्त्तसाधोः नृपस्य नगेन्द्रसक्ताम् दृष्टिम् रश्मिषु आदाय इव निवर्त्तयामास ॥२८॥

व्याख्या— गुहानिबद्धप्रतिशब्ददीर्घम् = कन्दरासमुत्पन्नप्रतिध्वनिप्रवृद्धम्, तदीयम् = नन्दिन्याः, आक्रन्दितम् = आक्रन्दनम् । आर्तसाधोः = सज्जनहितकारिणः । नृपस्य = महाराजदिलीपस्य । नगेन्द्रसक्ताम् = पर्वतराजहिमालये संलग्नाम् । दृष्टिम् = ईक्षणम् । रश्मिषु इव = प्रग्रहेषु यथा । आदाय = गृहीत्वा, निवर्तयामास = प्रत्यावर्तयामास ॥२८॥

संस्कृत भावार्थ—राजा दिलीपः पर्वतशोभावलोकनतत्पर आसीत्, नन्दिनी च गुहायाँ प्रविष्टा आसीत् । सा सिंहस्य आक्रमणकाले आर्तशब्दं कृतवती । नन्दिन्या आर्तस्वरमाकर्ण्यं राजा झटिति स्वकीयां दृष्टिं पर्वतविलोकनात् प्रत्यावर्त्य नान्दिनीं प्रति प्रेरयामास ॥२८॥

शब्दार्थ—गुहानिबद्धप्रतिशब्ददीर्घम् = कन्दरा में व्याप्त प्रतिध्वनि से बढ़े हुए । तदीयम् = नन्दिनी के । आक्रन्दितम् = आर्तनाद को । आर्तसाधोः = पीड़ितों (दुःखियों) के रक्षक । नगेन्द्रसक्ताम् = पर्वत पर लगी हुई । दृष्टिम् = नेत्र को । रश्मिषु = लगामों से । आदाय = ग्रहणकर । निवर्तयमास = लौटा लिया ॥२८॥

हिन्दी—हिमालय की गुहा में टकराई हुई प्रतिध्वनि के कारण और अधिक उच्च हुए नन्दिनी के आर्तनाद से दुःखित जनों का हित करने वाले राजा दिलीप की हिमालय की शोभा को देखने में लगी दृष्टि को लगाम के समान खींचकर आकृष्ट कर लिया ॥२८॥

विशेष—परीक्षा लेने के कारण जब सिंह ने गाय को पकड़ लिया और ले चला तब नन्दिनी के आर्तनाद के कारण राजा का चित्त हिमालय की शोभा को छोड़कर एकदम नन्दिनी की ओर चला, मानो रस्सी से पकड़कर खींच ली गई हो ।

प्रस्तुत श्लोक में सम्भावना की गई है कि मानो राजा की दृष्टि को रस्सियों से बाँध कर लौटा लिया हो अतः उत्प्रेक्षा अलंकार है ॥२८॥

प्रसंग—इसके बाद राजा ने नन्दिनी के ऊपर आक्रमण किये हुए सिंह को देखा—

स पाटलायां गवि तस्थिवांसं धनुर्धरः केसरिणं ददर्श ।
अधित्यकायामिव धातुमय्यां लोध्रद्रुमं सानुमतः प्रफुल्लम् ॥ २९ ॥

अन्वय—धनुर्धरः स पाटलायाम् गवि तस्थिवांसम् केसरिणम् सानुमतः धातुमय्याम् अधित्यकायाम् प्रफुल्लम् लोध्रद्रुमम् इव ददर्श ॥२९॥

संस्कृत टीका—धनुर्धरः=धनुर्धारकः । सः=महाराजः दिलीपः । पाटलायाम्=रक्तवर्णायाम्, गवि=नन्दिन्याम् । तस्थिवांसम् । केशरिणम्=सिंहम् । सानुमतः=पर्वतस्य, धातुमय्याम्=गौरिकादिधातुमय्याम्, अधित्यकायाम्=उच्चभूमौ । प्रफुल्लम्=विकसितम्, लोध्रद्रुमम्=विल्ववृक्षम्, इव=यथा । ददर्श=दृष्टवान् ॥२९॥

संस्कृत भावार्थ—राजा दिलीपः अद्रिशोभावलोकने संलग्नां स्वकीयां दृष्टिं झटिति गां प्रति प्रेरयामास । तेनावलोकितम्—यत् रक्तवर्णायां नन्दिन्यां सिंहः एवं प्रकारेण स्थितोऽस्ति । यथा पर्वतस्य धातुयुतायां अधित्यकायां विकसितं विल्ववृक्षः स्यात् ॥२९॥

शब्दार्थ—धनुर्धरः=धनुर्धारी राजा । पाटलायाम्=लाल रंग की । तस्थिवांसम्=बैठे हुये । केसरिणम्=शेर को । सानुमतः=पर्वत की । धातुमय्याम्=गौरिकादि धातुमयी । अधित्यकायाम्=उच्च भूमि पर । प्रफुल्लम्=फूले हुये । लोध्रद्रुमम्=लोध के वृक्ष को ॥२९॥ गाय

हिन्दी—धनुषधारी राजा दिलीप ने लाल रंग वाली नन्दिनी पर स्थित उस सिंह को गेरु आदि अनेक धातुओं से युक्त अधित्यका में विकसित विल्व-वृक्ष के समान देखा ॥२९॥ पर्वत की (उच्च भूमि पर)

विशेष—नन्दिनी के द्वारा परीक्षा हेतु किये जाने वाले आर्तस्वर को सुनकर राजा का ध्यान शीघ्र ही नन्दिनी की ओर गया तो उसने रक्तवर्ण वाली नन्दिनी के ऊपर सिंह को देखा । रक्तवर्ण वाली गाय के ऊपर बैठा हुआ वह केशरी ऐसा लग रहा था जैसे गेरु आदि धातुओं से युक्त अधित्यका भूमि पर खिला हुआ विल्ववृक्ष हो ।प्रस्तुत श्लोक में उपमा अलंकार है ॥२९॥

व्याकरण—तस्थिवांसम् = स्था + क्वसु । केसरिणम् = केसर + इनि । अधित्यकायाम् = अधि + त्यकन् + टाप् । धातुमय्याम् = धातु + मयट् + ङीप् । प्रफुल्लम् = प्र + फुल्ल + अच् ॥२९॥

प्रसंग—उसके बाद नन्दिनी पर आक्रमण किये हुये सिंह को देखकर महाराज दिलीप अत्यन्त दुःखी हुये और उसके वध करने का उपाय सोचने लगे—

ततो मृगेन्द्रस्य मृगेन्द्रगामी वधाय वध्यस्य शरं शरण्यः ।
जाताभिषङ्गो नृपतिर्निषङ्गादुद्धर्तुमैच्छत् प्रसभोद्धृतारिः ॥ ३० ॥

अन्वय—ततः मृगेन्द्रगामी शरण्यः प्रसभोद्धृतारिः नृपतिः जाताभिषङ्गः सन् वध्यस्य मृगेन्द्रस्य वधाय निषङ्गात् शरम् उद्धर्तुम् ऐच्छत् ॥३०॥

संस्कृत टीका—ततः = तदनन्तरम्, मृगेन्द्रगामी = सिंहवत् गतिशीलः, शरण्यः = आर्त्तरक्षेण साधुः, प्रसभोद्धृतारिः = हठात् विनाशितशत्रुः । नृपतिः = राजा दिलीपः । जाताभिषङ्गः = अपमानेन जातखेदः, (सन्) वध्यस्य = हननयोग्यस्य । मृगेन्द्रस्य = केसरिणः । वधाय = मारणाय । निषंगात् = तूणीरात्, शरम् = बाणम् । उद्धर्तुम् = निस्सारयितुम्, ऐच्छत् = अभिलाषां कृतवान् ॥३०॥

संस्कृत भावार्थ—नन्दियामाक्रान्त सिंहं विलोक्य राजा दिलीपः क्रुद्धो भूत्वा तस्य सिंहस्य वधाय स्वनिषंगात् शरं निःसारयितुम् ऐच्छत् । राजा-दिलीपः शरणागतवत्सलः आसीत् । अतः आक्रान्तां ज्ञात्वा तत्काल एव खिन्नः जातः । सिंहस्य वधः दिलीपस्य कृते दुष्कर आसीत् ॥३०॥

शब्दार्थ—मृगेन्द्रगामी = सिंह के समान गमन करने वाला । प्रसभोद्धृतारिः = बलपूर्वक शत्रुओं का नाश करने वाला । शरण्यः = शरणागतरक्षक । जाताभिषङ्गः = अपमान का अनुभव करते हुए । वध्यस्य = मारने के योग्य । वधाय = मारने के लिये । निषङ्गात् = तूणवीर से । शरम् = बाण को । उद्धर्तुम् = निकालने के लिये । ऐच्छत् = इच्छा की ॥३०॥

हिन्दी—आक्रमण करते हुए सिंह को देखकर सिंह के समान गति वाला तथा शरणागतों की रक्षा करने में निपुण एवं बलपूर्वक शत्रुओं का नाश करने वाला राजा दिलीप गाय के ऊपर आक्रमण करने वाले सिंह के वध के लिए तरकस से बाण निकालने लगा ॥३०॥

विशेष—राजा दिलीप स्वयं की देखभाल में चरने वाली गाय के ऊपर सिंह का आक्रमण देखकर क्रुद्ध हो गया; क्योंकि वह शरणगतों के रक्षण में तत्पर था। अतः उसने गाय की रक्षा के निमित्त सिंह को मारने के लिये तरकस से बाण निकालना चाहा।

प्रस्तुत श्लोक में अभिप्राय से गर्भित विशेषणों का प्रयोग किया जाने के कारण परिकर अलंकार है। राजा को "मृगेन्द्रगामी" कहे जाने के कारण गाय पर आक्रमण करने वाले सिंह का वध करने में समर्थ है। इस प्रकार राजा का, शरण्यः, प्रसभोद्धृतारिः, और 'जाताभिषङ्गः' विशेषण भी अभिप्राय से गर्भित है। इसके अतिरिक्त यमक अलंकार भी है ॥३०॥

समास—मृगेन्द्रस्य = मृगाणाम् इन्द्रस्य (षष्ठीतत्पुरुषसमास)। मृगेन्द्रगामी = मृगेन्द्र इव गन्तुं शीलमस्य (बहुव्रीहि समास)। जाताभिषङ्गः = जातः अभिषङ्गः यस्य सः (बहुव्रीहि) ॥३०॥

व्याकरण—तद् + तसिल्। वधस्य = वध + यत ष. ए. व.। शरण्यः = शरण + यत्। उद्धर्तुम् = उत् + हृ + तुमुन्। ऐच्छत् = इष् + लङ् प्र० पु० ए० व० ॥३०॥

प्रसंग—उसके बाद आक्रमण करने वाले सिंह का वध करने की इच्छा से जब राजा ने तरकस से बाण निकालने की चेष्टा की तो राजा का हाथ ही चिपक गया। उसका वर्णन करते हुए कहते हैं—

वामेतरस्तस्य करः प्रहर्तुर्नखप्रभाभूषितकङ्कपत्रे।
सक्ताङ्गुलिः सायकपुङ्ख एव चित्रार्पितारम्भ इवावतस्थे ॥३१॥

अन्वय - प्रहर्तुः तस्य वामेतरः करः नखप्रभाभूषितकङ्कपत्रे सायकपुङ्खे एव सक्तांगुलिः चित्रार्पितारम्भः इव अवतस्थे ॥३१॥

संस्कृत टीका - प्रहर्तुः = प्रहारं कर्तुमुद्यतस्य। तस्य = राज्ञः दिलीपस्य, वामेतरः = दक्षिणः। करः = हस्तः। नखप्रभाभूषितकङ्कपत्रे = करोरुहकान्तिभिरलंकृतकंकनामकपक्षिविशेषपत्रे। सायकपुंखे = वाणस्य पक्षयुक्ते प्रदेशे, एव = अवधारणे, सक्तांगुलिः = दृढ़लग्नकराग्रः। चित्रार्पितारम्भः = आलेख्य लिखितगोरक्षोद्योगः, इव = यथा, अवतस्थे = स्थितोऽभूत् ॥३१॥

संस्कृत भावार्थ—गामुपरि प्रहरणशीलं सिंहं दृष्ट्वा प्रतीकारं कर्त्तु-मुद्यतस्य राज्ञः दिलीपस्य दक्षिणहस्तः बाणस्य मूलप्रदेशे एव संलग्नो भवेत्। तदा सः चित्रलिखित इव स्थित आसीत् ॥३१॥

शब्दार्थ—प्रहर्तुः=प्रहार करने वाले। वामेतरः=बायें से भिन्न, दाहिना। करः=हाथ। नखप्रभाभूषितकङ्कपत्रे=नख की कान्ति से सुशोभित काक पंख वाले। सायकपुङ्खे=बाण के मूल प्रदेश में। सक्ताङ्गुलिः=चिपकी हुई अङ्गुलियों वाला। चित्रार्पितारम्भ=चित्र में लिखित बाण निकालने का प्रयास। अवतस्थे=स्थिर हो गया ॥३१॥

हिन्दी—प्रहार करने वाले महाराज दिलीप का दहिना हाथ नाखून की शोभा से सुशोभित कंङ्क पक्षी के पंख जिसमें लगे हुए हैं, ऐसे बाण के पंख से युक्त स्थान पर अंगुलियाँ लग गई हैं। इस प्रकार वह चित्र में लिखित बाण निकालने की क्रिया में संलग्न के समान हो गया था ॥३१॥

विशेष—नन्दिनी के वध में प्रवृत्त सिंह को मारने के लिये राजा ने तरकस से बाण निकालना चाहा। बाण को पकड़ने के लिये जैसे ही दाहिना हाथ डाला तो जिन बाणों पर कङ्क पक्षी के पंख लगे हुए थे, वे राजा के हाथ की अंगुलियों से शोभित हो उठे। परन्तु राजा की अंगुलियाँ वहीं पर चिपक गई। इस दशा में राजा हाथ को भी नहीं हिला सका इस कारण उस समय वह ऐसा लग रहा था। मानो किसी चित्र में बाण निकालने का उद्योग कर रहा हो।

प्रस्तुत श्लोक में राजा की अंगुलियों के बाण के मूल प्रदेश पर चिपक जाने के कारण इस उपमेय की सम्भावना की गई है कि मानो वह चित्रलिखित हो। इस कारण उत्प्रेक्षा अलंकार है ॥३१॥

समास—नखप्रभाभूषितकङ्कपत्रे—नखानां प्रभया भूषितम् कङ्कस्य पत्रं यस्य सः तस्मिन् (बहुव्रीहि)। सक्ताङ्गुलिः=सक्ताः अंगुलयः यस्य सः (बहुव्रीहि) सायकपुङ्खे=सायकस्य पुङ्खे (षष्ठी तत्पुरुष)। चित्रार्पितः आरम्भः यस्य सः (बहुव्रीहि) ॥३१॥

व्याकरण—करः=कृ+अप्। भूषितः=भूषा+इतच्। पत्रम्=पत्+ष्ट्रन्। सक्ताः=सञ्ज्+क्त+टाप्। सायक==सो+ण्वुल्। आरम्भ=आ+रभ्+घञ्। अवतस्थे=अव+स्था+लिट् प्र॰ पु॰ ए॰ व॰ ॥३१॥

प्रसंग—इसके बाद राजा का हाथ बाण पर चिपक जाने से स्तम्भित और क्रुद्ध स्थिति का वर्णन करते हुये महाकवि कहते हैं—

बाहुप्रतिष्टम्भविवृद्धमन्युरभ्यर्णमागस्कृतमस्पृशद्भिः ।
राजा स्वतेजोभिरदह्यतान्तर्भोगीव मन्त्रौषधिरुद्धवीर्यः ॥३२॥

अन्वय—बाहुप्रतिष्टम्भविवृद्धमन्युः राजा मन्त्रौषधिरुद्धवीर्यः भोगी इव अभ्यर्णम् आगस्कृतम् अस्पृशद्भिः स्वतेजोभिः अन्तः अदह्यत ॥३२॥

संस्कृत टीका—बाहुप्रतिष्टम्भविवृद्धमन्युः = दक्षिणहस्तस्य बन्धनेन विवृद्धक्रोधः । राजा = दिलीपः । मन्त्रौषधिरुद्धवीर्यः = विषनाशकगारुडमन्त्रौषधिभ्यां निरुद्धतेजः, भोगी इव = सर्प इव, अभ्यर्णम् = समीपस्थितम्, आगस्कृतम् = अपराधिनम्, अस्पृशद्भिः = न स्पृशद्भिः, स्वतेजोभिः = आत्मनः प्रभावैः, अन्तः = हृदयस्य मध्ये, अदह्यत = अतप्यत ॥३२॥

संस्कृत भावार्थ—तस्य राज्ञः दिलीपस्य दक्षिणहस्तः यदा बाणस्य पुङ्खप्रदेशे संलग्नो जातः, तदा सः अत्यन्तक्रुद्धोऽभवत् । यथा मन्त्रौषधिप्रभावेन निरुद्धतेजः सर्पः तप्यते, तथैव यत् अन्तिकस्थं अपराधिनं तं सिंहं व्यापादयितुमसमर्थः राजा स्वतेजोभिः स्वयमेव अतप्यत ॥३२॥

शब्दार्थ—बाहुप्रतिष्टम्भविवृद्धमन्युः = बाहुओं के रुक जाने से बढ़े हुये क्रोध वाले । मन्त्रौषधिरुद्धवीर्यः = मन्त्र और औषधि के द्वारा रुके हुये शक्ति वाले । भोगी इव = सांप के समान । अभ्यर्णम् = समीप में । आगस्कृतम् = अपराधी को । अस्पृशद्भिः = स्पर्श न कर सकने वाले । स्वतेजोभिः = अपने तेज से । अन्तः = भीतर ही भीतर । अदह्यत = जलने लगे ॥३२॥

हिन्दी—भुजाओं के बंध जाने के कारण और भी अधिक क्रोधित होता हुआ राजा दिलीप मन्त्र और औषधियों से जिसका तेज रोक दिया गया है ऐसे सर्प की तरह समीप में ही अपराध करने वाले और स्पर्श तक भी न किये जाने वाले इस सिंह पर क्रोध करने के कारण अन्दर ही अन्दर जलने लगे ॥३२॥ से अपने तेज के कारण

विशेष—जब राजा ने तरकस से बाण निकलना चाहा और हाथ वहीं पर चिपक गया तो राजा अत्यन्त क्रोधित हुआ, क्योंकि राजा में सिंह का वध करने की सामर्थ्य तो था पर हाथ चिपक जाने के कारण कुछ भी कर सकने में समर्थ नहीं था । अतः विशेष क्रोध आना स्वाभाविक है । इस

पर भी अपराधी सिंह पास ही था। फिर भी उसका वध तो दूर था पर छू सकने की भी सामर्थ्य उसमें नहीं थी। इस कारण स्वयम् ही क्रोध में ऐसे जलने लगा, जैसे कोई अत्यन्त विषैला सांप जब मन्त्र और औषधि से जिसके विष को दवा दिया जाता है तब वह जलता है।

प्रस्तुत श्लोक में राजा उपमेय, भोगी उपमान, पराक्रम के रुक जाने से अन्दर ही अन्दर जलना साधरण धर्म और इव उपमा का वाचक होने के कारण पूर्णोपमा है ॥३२॥

समास—बाहुप्रतिष्टम्भविवृद्धमन्युः=बाहोः प्रतिष्टम्भेन विवृद्धः मन्युः यस्य सः (बहुब्रीहि)। मंत्रौषधिरुद्धवीर्यः=मन्त्राश्च ओषधयश्च (द्वन्द्व स०) ताभ्यां रुद्धं वीर्यं यस्य सः (बहुब्रीहि) ॥२२॥

व्याकरण—प्रति+स्तम्भ+अच्। विवृद्ध=वि+वृध्+क्त। आगस्कृतम्=आगस्+कृ+क्त। स्पृशत्=स्पृश्+शतृ। भोगी=भोग+इनि। रुद्धः=रुध्+क्त ॥३२॥

प्रसंग—इसके बाद जब राजा का उद्योग में असफल हो गया और क्रोध में जलने लगा तो तब सिंह मनुष्य की वाणी में बोला—

तमार्यगृह्यं निगृहीतधेनुः, मनुष्यवाचा मनुवंशकेतुम्।
विस्माययन् विस्मितमात्मवृत्तौ, सिंहोरुसत्वं निजगाद सिंहः ॥३३॥

अन्वय—निगृहीतधेनुः सिंहः आर्यगृह्यम् मनुवंशकेतुम् सिंहोरुसत्त्व आत्मवृत्तौ विस्मितम् तम् मनुष्यवाचा विस्माययन निजगाद ॥३३॥

संस्कृत टीका—निगृहीतधेनुः=सम्पीड़ितनन्दिनीकः, सिंहः=केशरी आर्यगृह्यम्=श्रेष्ठपुरुषैः आदरणीयम्, मनुवंशकेतुम्=मनोः कुलस्य ध्वजाभूतम्, सिंहोरुसत्त्वम्=केशरीवमहत्त्वशालिनम्। आत्मवृत्तौ विस्मितम्=स्वस्य विषये आश्चर्यान्वितम्, तम्=राजानं दिलीपम्, विस्माययन्=आश्चर्यान्वितं कुर्वन्। मनुष्यवाचा=मानवानां वाचा, निजगाद=उवाच ॥३३॥

संस्कृत भावार्थ—यदा राजा स्वोद्योगेऽसफलः क्रोधे ज्वलन्नासीत्, तदा पीडितनन्दिनीकः सिंहः सज्जनपुरुषैः आदरणीयं मनुवंशस्य श्रेष्ठपुरुषं

सिंह इव बलशालिनम् तथा स्वबाहोः प्रतिस्तब्धेन आश्चर्यजनकं मनुष्यवाण्या प्रवचनेन पुनरपि विस्माययन् उवाच ॥३३॥

शब्दार्थ—निगृहीतधेनुः=गाय को पीड़ित करने वाले। आर्यगृह्यम्=सज्जनों द्वारा सम्माननीय। मनुवंशकेतुम्=मनुकुल की ध्वजा के समान शक्तिशाली। आत्मवृत्तौ=अपने विषय में। विस्मितम्=आश्चर्य युक्त। मनुष्यवाचा=मनुष्य की वाणी द्वारा। विस्माययन्=विस्मित करते हुए॥३३॥

हिन्दी—नन्दिनी को कष्ट पहुँचाता हुआ वह सिंह सज्जनों से सम्माननीय मनुवंश की पताका के समान, बल में सिंह के समान, अपनी भुजा के चिपक जाने के कारण विस्मय की दशा में वर्तमान राजा दिलीप को मनुष्य वाणी के उच्चारण द्वारा और भी आश्चर्य चकित करता हुआ बोला ॥३३॥

विशेष—राजा दिलीप सज्जनों द्वारा आदरणीय, मनुवंश के पताका के समान सिंह के समान बलशाली होते हुए भी अपने हाथ के बाण के अग्रभाग पर चिपक जाने के कारण पहले से ही आश्चर्य चकित थे। इस पर सिंह ने मनुष्य की वाणी में बोलकर राजा को और भी आश्चर्य में डाल दिया।

प्रस्तुत श्लोक में 'सिंहोरुसत्त्वम्' में सिंह उपमान राजा उपमेय और उरुसत्त्व साधारण धर्म होने के कारण उपमा अलंकार है। इसके अतिरिक्त यमक अलंकार भी है ॥३३॥

समास—आर्यगृह्यम्=आर्यैः गृह्यम् (तत्पुरुष)। निगृहीतधेनुः=निगृहीता धेनुः येन सः (बहुव्रीहि)। मनुष्यवाचा=मनुष्याणाम् वाचा (षष्ठीतत्पुरुष)। मनुवंशकेतुम्=मनोः वंशस्य केतुम् (षष्ठीतत्पुरुष)। आत्मवृत्तौ=आत्मनः वृत्तौ (षष्ठीतत्पुरुष.)। सिंहोरुसत्त्वम्=सिंह इव उरुः सत्त्वः यस्य सः (बहुव्रीहि) ॥३३॥

व्याकरण--गृह्यम्=गृह+क्यप्। निगृहीत=नि=ग्रह्=क्त। विस्माययन्=वि+स्मि+णिच्+शतृ। विस्मित=वि+स्मि+क्त। वृत्तिः==वृ+क्तन्। निजगाद=नि+गद्+लिट् प्र० पु० एक० ॥३३॥

प्रसंग—इसके बाद सिंह मनुष्य की वाणी में राजा से उद्योग की निष्फलता बताते हुए कह रहा है—

अलं महीपाल ! तव श्रमेण प्रयुक्तमप्यस्त्रमितो वृथा स्यात् ।
न पादपोन्मूलनशक्ति रंहः शिलोच्चये मूर्च्छति मारुतस्य ॥ ३४॥

अन्वय—हे महीपाल ! तव श्रमेण अलम् इतः प्रयुक्तम् अपि अस्त्रम् वृथा स्यात् । (हि) पादपोन्मूलनशक्ति मारुतस्य रंहः शिलोच्चये न मूर्च्छति ॥ ३४ ॥

संस्कृत टीका—हे महीपाल = हे राजन्! दिलीप ! तव = भवतः, श्रमेण = परिश्रमेण, अलम् = व्यर्थम् । इतः = अस्मिन् स्थानेऽपि, प्रयुक्तम् = प्रक्षिप्तम्, अपि = सम्भावनायाम् । अस्त्रम् = आयुधम्, वृथा = निरर्थकम् स्यात् = भवतु । पादपोन्मूलनशक्ति = वृक्षानां उन्मूलने शक्तिमत् मारुतस्य = पवनस्य । रंहः = वेगः । शिलोच्चये = पर्वते, न = नहि, मूर्च्छति = प्रभवति ॥ ३४ ॥

संकृत भावार्थ—मनुष्यवाण्या राजानं विस्मापयन् सिंहः अकथयत् = यत् हे राजन्! मम वधाय त्वया कृतं प्रयत्नं व्यर्थं भविष्यति । मयि प्रयुक्तं अस्त्रम् अपि व्यर्थं भविष्यति । यतः वृक्षाणाम् उन्मूलने एव सामर्थ्यवान् पवनः उच्चपर्वतशिखरम् उत्पाटयितुं समर्थो न भवति ॥ ३४ ॥

शब्दार्थ—महीपाल = पृथ्वी के स्वामी । पादपोन्मूलशक्ति = वृक्षों को उखाड़ने की शक्ति से युक्त । मारुतस्य = वायु का । रंहः = वेग । शिलोच्चये = पर्वत पर । न मूर्च्छति = प्रभाव नहीं करता ॥ ३४ ॥

हिन्दी—हे पृथ्वीपालक, ! आपका श्रम करना बेकार है । मेरे ऊपर प्रयोग किया जाने वाला अस्त्र भी बेकार हो जायेगा । क्यों कि वृक्षों को उखाड़ कर फेंकने वाले वायु का वेग ऊँचे पर्वत को उखाड़ने में समर्थ नहीं होता है ॥ ३४ ॥

विशेष—सिंह ने राजा से कहा कि हे राजन्? तुम व्यर्थ में श्रम मत करो । यदि तुम्हारा हाथ छूट भी जाय तो भी तुम्हारा परिश्रम व्यर्थ होगा । क्योंकि वृक्षों को उखाड़ फेंकने वाला वायु पर्वत के चट्टानों को नहीं उखाड़ सकता है ।

प्रस्तुत श्लोक में दो वाक्य है—श्रम मत करो, तुम्हारा श्रम व्यर्थ जायेगा तथा पेड़ों को उखाड़ने वाली वायु पर्वत को उखाड़ने में व्यर्थ है। यहाँ वायु पेड़ों को ही उखाड़ सकती है पर्वतों को नहीं इस कथन के द्वारा 'अतः तुम श्रम मत करो तुम्हारे द्वारा प्रयुक्त अस्त्र व्यर्थ जायेगा', इसका समर्थन किया गया है। अतः अर्थान्तरन्यास अलंकार है।। ३४।।

समास—पादपोन्मूलनशक्ति=पादपानाम् उन्मूलने शक्तिः यस्य तत् (बहुव्रीहि.) शिलोच्चये=शिलानां उच्चयः तस्मिन् (षष्ठीतत्पुरुष.) ।। ३४।।

व्याकरण—अलम्=अव्यय शब्द है। प्रयुक्तम्=प्र+युज्+क्त। उन्मूलनम्—उत्+मूल+ल्युट् (अन)। इतः=इदम्+तसिल्। स्यात्=अस्+लिङ् प्र० पु० एक व०।। ३४।।

प्रसंग—हे राजन्? तुम मुझे कोई साधारण सिंह मत समझो। इस प्रकार अपना परिचय देते हुए सिंह कहता है—

> **कैलासगौरं वृषमारुरुक्षोः पादार्पणानुग्रहपूतपृष्ठम्।**
> **अवेहि मां किङ्करमष्टमूर्तेः कुम्भोदरं नाम निकुम्भमित्रम् ।। ३४।।**

अन्वय—कैलासगौरम् वृषम् आरुरुक्षोः अष्टमूर्तेः पादार्पणानुग्रहपूतपृष्ठम् निकुम्भमित्रम् कुम्भोदरम् नाम किङ्करम् (माम्) अवेहि।। ३५।।

संस्कृत टीका—माम्=पुरः उपस्थितम् सिंहम्, कैलाशगौरम्=कैलाशपर्वत इव शुभ्रवर्णम्। वृषम्=वृषभम्। आरुरुक्षोः=आरोहणम् कर्तुमिच्छोः। अष्टमूर्तेः=शिवस्य। पादार्पणानुग्रहपूतपृष्ठम्=चरणयोः न्यासेन पवित्र-पृष्ठभागम्। निकुम्भमित्रम्=निकुम्भाख्यस्य शिवानुचरस्य सुहृदम्, कुम्भोदरनामानाम्, अवेहि=जानीहि।। ३५।।

संस्कृत भावार्थ—स्वस्थितौ विस्मितं राजानं सिंहः प्रोवाच—हे राजन्। अहं साधारणः सिंहो नास्मि। किन्तु अष्टमूर्तेः शंकरस्य किंकरोऽस्मि। कैलाश इव धवलवर्णं वृषभं यदा शिवः आरोहति तदा मम पृष्ठभागे चरणौ निधाय एव आरोहति, अतः शंकरस्य पादयोः स्पर्शेन मम पृष्ठभागं पवित्रं जातमस्ति। अहं शिवस्य परमसेवकः तथा निकुम्भनामकस्य शिवानुचरस्य मित्रम् अस्मि।।। ३५।।

शब्दार्थ—कैलाशगौरम् = कैलाशपर्वत के समान गौरवर्ण। वृषम् = बैल पर। आरुरुक्षोः = चढ़ने की इच्छा वाले। अष्टमूर्तेः = भगवान् शंकर के। पादार्पणानुग्रहपूतपृष्ठम् = पैरो को रखने से पवित्र पीठ वाले। निकुम्भमित्रम् = निकुम्भ का मित्र। कुम्भोदरम् = कुम्भोदर नामक। किङ्करम् = सेवक ॥ ३५ ॥

हिन्दी—हे राजन् ? मुझको कैलाश नामक पर्वत के समान शुभ्र वर्ण वाले बैल पर चढ़ने की इच्छा से शंकर जी के पादस्पर्श से पवित्र पृष्ठभाग वाला मुझे निकुम्भ का मित्र कुम्भोदर नामक शिव का सेवक जानो ॥ ३५ ॥

विशेष—सिंह ने राजा से कहा कि मैं कोई साधारण सिंह नहीं हूँ। मैं भगवान् शंकर का सेवक हूँ जब भगवान् शंकर कैलाश के समान सफेद वर्ण के बैल पर चढ़ते है तब मेरी पीठ पर पैर देकर चढ़ते है। अतः मेरी पीठ उनके चरणस्पर्श से पवित्र हो गई है। इसके अतिरिक्त मैं शंकर के सेवक निकुम्भ का मित्र हूँ। यहाँ शिव जी की अष्टमूर्तियों का उल्लेख है। इसलिये यहाँ पर उपमा अलंकार है ॥ ३५ ॥

समास—कैलाशगौरम् = कैलाश इव गौरम् (उपमितकर्मधारय) पादार्पणानुग्रहपूतपृष्ठम् = पादयोः अर्पणम् एव अनुग्रहः तेन पूतं पृष्ठं यस्य सः (बहुव्रीहि.)। अष्टमूर्तेः = अष्ट मूर्तयः यस्य सः (बहुव्रीहि.) कुम्भोदरम् = कुम्भ इव उदरम् यस्य सः (बहुव्रीहि)। निकुम्भमित्रम् = निकुम्भस्य मित्रम् (षष्ठीतत्पुरुष) ॥ ३५ ॥

व्याकरण—आरुरुक्षोः. आ + रुह् + सन् + उ। अनुग्रह = अनु + ग्रह् + अप्। पूत = पू + क्त। पृष्ठ = पृष् + थक्। अवेहि = अव् + इण् + लोट म० पु० ए० व० ॥ ३५ ॥

प्रसंग—इसके बाद सिंह वहाँ पर अपनी नियुक्ति का कारण बताते हुये कहता है—

> अमुं पुरः पश्यसि देवदारुं पुत्रीकृतोऽसौ वृषभध्वजेन।
> यो हेमकुम्भस्तननिःसृतानां स्कन्दस्य मातुः पयसां रसज्ञः ॥ ३६ ॥

अन्वय–पुरः अमुम् देवदारुम् पश्यसि, असौ वृषभध्वजेन पुत्रीकृतः यः स्कन्दस्य मातुः हेमकुम्भस्तननिःसृतानाम् पयसाम् रसज्ञः ।। ३६ ।।

संस्कृत टीका—पुरः=अग्रतः । अमुम्=एनम् । देवदारुम्=देवदारु नामकं वृक्षम्, पश्यसि=विलोकयसि, असौ=अयम् देवदारुवृक्षः। वृषभध्वजेन=बलीवर्दपताकेन । पुत्रीकृतः=पुत्रत्वेन स्वीकृतः । यः=देवदारुः स्कन्दस्य=कार्तिकेयस्य । मातुः=जनन्याः पार्वत्याः, । हेमकुम्भस्तननिःसृतानाम् =सुवर्णसदृशघटस्तननिर्गतानाम्, पयसाम्=दुग्धानाम् जलानाम् । रसज्ञः= रसास्वादकः अस्ति ।। ३६ ।।

संस्कृत भावार्थ–सिंहः राजानम् कथयति–यत् अहम् अत्र पुरः स्थितम् देवदारुं रक्षितुं शिवेन नियुक्तोऽस्मि । असौ देवदारुः शिवेन पुत्रत्वेन स्वीकृतोऽस्ति । अयम् वृक्षः पर्वत्या सुवर्णकुम्भसदृशस्तननिर्गतैः जलैः स्वामि-कार्तिकेयतुल्यः पोषितोऽस्ति । अतएव अहम् अस्य रक्षणे नियुक्तोऽस्मि ।। ३६ ।।

शब्दार्थ—वृषभध्वजेन=भगवान् शंकर के द्वारा । पुत्रीकृतः=पुत्र के रूप में स्वीकार किया गया । स्कन्दस्य मातुः=पार्वती के । हेमकुम्भस्तननिः-सृतानाम्=सोने के घट रूप स्तनों से निकले हुये । पयसाम्=दूध के । रसज्ञः =रस (स्वाद) का ज्ञाता ।। ३६ ।।

हिन्दी—हे राजन् ! सामने तुम जिस देवदारु वृक्ष को देखते हो यह वृक्ष भगवान् शिव ने पुत्र के समान स्वीकार किया है। (यह देवदारु का वृक्ष) स्वामि-कार्तिकेय की माता पार्वती के स्तन स्वरूप सुवर्ण कुम्भों से निकले हुये जलो के रस को जानने वाला है। ।। ३६ ।।

विशेष—सिंह ने राजा से कहा--हे राजन् ! सामने जो देवदारु का वृक्ष दिखाई देता है उसे शिव जी ने पुत्र के रूप में मान लिया है । यह पार्वती जी के द्वारा सींचा और बढ़ाया गया है । स्वामिकार्तिकेय ने जिस प्रकार सुवर्ण के सदृश पार्वती के स्तनों का दूध पिया है । उसी प्रकार इस वृक्ष ने भी सुवर्ण सदृश घटों के जलों से सिंचन किया गया है। प्रस्तुत श्लोक में रूपक अलंकार है ।। ३६ ।।

समास—वृषभध्वजेन=वृषभध्वजे यस्य स तेन (बहुव्रीहि स०) हेमकुम्भस्तननि:सृतानाम्=हेम्नः कुम्भः (षष्ठीतत्पुरुष स०) हेमकुम्भ एव स्तनः (कर्मधारय स०) हेमकुम्भस्तनात् नि:सृतानाम् (पंचमीतत्पुरुष) ॥३६॥

व्याकरण—पुत्रीकृतः=पुत्र+च्वि+कृ+क्त। रसज्ञः=रस+ज्ञा+क। नि:सृतानाम्=निर्+सृ+क्त ॥३६॥

प्रसंग—इसके बाद वृक्ष की रक्षा में क्यों नियुक्त किया गया! इसका कारण बताते हुये सिंह कहता है—

कण्डूयमानेन कटं कदाचिद्, वन्यद्विपेनोन्मथिता त्वगस्य।
अथैनमद्रेस्तनया शुशोच सेनान्यमालीढमिवासुरास्त्रैः ॥३७॥

अन्वय—कदाचिद् कटम् कण्डूयमानेन वन्यद्विपेन अस्य त्वक् उन्मथिता, अथ अद्रेः तनया (एनम्) असुरास्त्रैः आलीढम् सेनान्यम् इव शुशोच ॥३७॥

संस्कृत टीका—कदाचित्=कस्मिश्चिद् समये, कटम्=गण्डस्थलम्, कण्डूयमानेन=घर्षणम् कुर्वता, वन्यद्विपेन=आरण्यकगजेन, अस्य=पुरः स्थितस्य देवदारोः, त्वक्=वल्कलम्, उन्मथिता=उत्पाटिता, अथ=पश्चात्, अद्रेः=पर्वतस्य, तनया=पुत्री पार्वती, एनम्=देवदारुम् असुरास्त्रैः=राक्षसायुधैः, आलीढम्=क्षतम्, सेनान्यम्=स्वामिकार्तिकेयम्, इव=यथा, शुशोच=दुखिता बभूव ॥३७॥

संस्कृत भावार्थ—सिंहः कथयति यत् एकदा कश्चिद् वनगजः कण्डूयनव्याजेन अस्य वल्कलम् उत्पाटितवान्। उत्पाटितवल्कलम् अमुम् विलोक्य पार्वती एवम् दुखिता आसीत् यथा राक्षसायुधैः पीड़ितं स्वामिकार्तिकेयं दृष्ट्वा दुःखिता आसीत् ॥३७॥

शब्दार्थ—कदाचित्=कभी। कटम्=गण्डस्थल को। कण्डूयमानेन=खुजलाते हुये। वन्यद्विपेन=जंगली हाथी के द्वारा। त्वक्=वल्कल छाल। उन्मथिता=उखाड़ दी। अद्रेः तनया=पार्वती। असुरास्त्रैः राक्षसों के अस्त्रों से। आलीढम्=घायल। सेनान्यम्=स्वामिकार्तिकेय के समान। शुशोच=शोक किया था ॥३७॥

हिन्दी—किसी समय अपने (कपोल) को खुजलाते हुये किसी जंगली हाथी ने इस देवदारु वृक्ष की छाल उखाड़ दी थी। तदनन्तर उसे देखकर पार्वती

जी को दैत्यों के अस्त्रों से घायल हुये अपने पुत्र स्वामिकार्तिकेय के समान दुःख हुआ था ॥३७॥

विशेष—सिंह ने कहा कि हे राजन् ! किसी समय किसी जंगली हाथी ने इस वृक्ष से अपनी कपोल को खुजलाया और इसकी छाल को उखाड़ दिया। इससे माता पार्वती को इतना दुःख हुआ जितना राक्षसों से युद्ध के समय स्वामिकार्तिकेय के घायल हो जाने पर हुआ था। प्रस्तुत श्लोक में उपमा अलंकार हैं ॥३७॥

समास—वन्यद्विपेन = वन्यश्चासौ द्विपः तेन (कर्मधारय स०)। असुरास्त्रैः = असुराणाम् अस्त्रैः (षष्ठीतत्पुरुष) ॥३७॥

व्याकरण—कण्डूयमानेन = कण्डू + यक् + शानच्। वन्यः = वन + यत्। द्विपः = द्वि + पा + क। उन्मथिता = उत् + मथ + क्त + टाप्। सेनान्यम् = सेना + नी + क्विप्। आलीढ = आ + लिह् + क्त। शुशोच = शुच + लिट् लकार प्र० पु० ए० व० ॥३७॥

प्रसंग—उस दिन से भगवान् शंकर ने मुझे उसकी रक्षा में नियुक्त कर दिया है, इसी का वर्णन करते हुये कवि कहता है—

तदा प्रभृत्येव वनद्विपानां त्रासार्थमस्मिन्नहमद्रिकुक्षौ।
व्यापारितः शूलभृता विधाय सिंहत्वमङ्कागतसत्ववृत्ति ॥३८॥

अन्वय—तदा प्रभृति एव वनद्विपानाम् त्रासार्थम् शूलभृता अङ्कागतसत्ववृत्ति सिंहत्वम् विधाय अस्मिन् अद्रिकुक्षौ अहम् व्यापारितः ॥३८॥

संस्कृत टीका—तदाप्रभृति = तत्कालादारभ्य, एव = अवधारणे, वनद्विपानाम् = आरण्यकगजानाम्, त्रासार्थम् = भयार्थम्, शूलभृता = शंकरेण, अङ्कागतसत्ववृत्ति = स्वाङ्कागतजन्तुजीवनम्, सिंहत्वम् = मृगेन्द्रत्वम्, विधाय = कृत्वा, अस्मिन् = पुरो दृश्यमाने, अद्रिकुक्षौ = पर्वतोदरे, अहम् = केशरी, व्यापारितः = नियुक्तः ॥३८॥

संस्कृत भावार्थ—वृक्षस्य वल्कलोत्पाटनावसरादेव वृषभध्वजेन अहम् अत्र वनगजानाम् त्रासार्थमेव नियुक्तः तथा शिवेनादिष्टोऽहमत्र यदि कोऽपि जन्तुः समागच्छेत् तत्त्वया भक्षितव्यः। अतोऽहम् तस्य रक्षार्थं निवसामि ॥३८॥

शब्दार्थ—तदाप्रभृत्येव=उसी दिन से लेकर। वनद्विपानाम्=जंगली हाथियों को। त्रासार्थम्=डराने के लिये। शूलभृता=भगवान् शंकर ने। अङ्कागतसत्ववृत्तिः=अङ्क (समीप) में आये हुये जन्तुओं से जीविका चलाने वाला। विधाय=बनाकर। अद्रिकुक्षौ=पर्वत की कन्दरा में। व्यापारितः=नियुक्त किया है ॥३८॥

हिन्दी—तभी से लेकर त्रिशूल धारण करने वाले शिवजी ने जंगली हाथियों को भयभीत करने के लिये मुझे उस पर्वत की कन्दरा में आये हुये जीवों के भक्षण से जीवन निर्वाह करने वाला सिंह बनाकर मुझे नियुक्त किया है ॥३८॥

विशेष—मृगेन्द्र ने कहा कि जब से वृक्ष की छाल को वनगजों ने उपाट दिया था तभी से शंकरजी ने मुझे इसकी रक्षा में सिंह का स्वरूप देकर नियुक्त कर दिया है। साथ ही समीप में आये हुये जीवों का मैं भक्षण करता रहता हूँ। प्रस्तुत श्लोक में जंगली हाथियों के डराने के लिये इस हेतु से सिंह का नियुक्त किया जाना कार्य होने के कारण हेतु अलंकार है।

समास—वनद्विपानाम्=वने: भवा: द्विपा: तेषाम् (कर्मधारय)। अद्रिकुक्षौ =अद्रे: कुक्षौ (षष्ठीतत्पुरुष स०)। अङ्कागतसत्ववृत्ति=अङ्कम् आगता: सत्त्वा: वृत्तय: यस्मिन् तत् (बहुव्रीहि स०) ॥३८॥

व्याकरण—प्रभृति=प्र+भृ+क्तिन्। त्रास=त्रस्+घञ्। व्यापारितः =वि+आ+पृ+णिच्+क्त। शूलभृता=शूल+भृ+क्विप्। विधाय= वि+धा+क्त्वा (ल्यप्)। सिंहत्वम्=सिंह+त्वल्। वृत्+क्तिन् ॥३८॥

प्रसंग—उसके बाद सिंह ने कहा कि 'यहाँ आने वाला प्राणी मेरा भक्ष्य है' अत: यह गाय परमेश्वर ने भेजी है—

> तस्यालमेषा क्षुधितस्य तृप्त्यै, प्रदिष्टकाला परमेश्वरेण।
> उपस्थिता शोणितपारणा मे सुरद्विषश्चान्द्रमसी सुधेव ॥३९॥

अन्वय—परमेश्वरेण प्रदिष्टकाला उपस्थिता एषा शोणितपारणा सुरद्विषः चान्द्रमसी सुधा इव क्षुधितस्य तस्य मे तृप्त्यै अलम् ॥३९॥

संस्कृत टीका—क्षुधितस्य=बुभुक्षायुक्तस्य, तस्य=शिवसेवकस्य, मे=मम, परमेश्वरेण=महादेवेन, प्रदिष्टकाला=निर्दिष्टमृत्युसमया, उपस्थिता=अत्र संप्राप्ता, एषा=नन्दिनी, शोणितपारणा=रुधिरस्य उपवासान्तभोजनम्, सुरद्विषः=दैत्यस्य राहोः, चान्द्रमसी=इन्दुसम्बन्धिनी, सुधा=अमृतम्, इव=यथा, तृप्त्यै=परितृप्त्यै, अलम्=पर्याप्तम् ॥३९॥

संस्कृत भावार्थ—सिंहः कथयति यदियं धेनुः बुभुक्षितस्य मे तृप्त्यर्थम् स्वयमेव उपस्थिता। अतः इयं मे तृप्त्यर्थं पर्याप्ता विद्यते यथा चान्द्रमसी सुधा राहोः तृप्त्यर्थं भवति ॥३९॥

शब्दार्थ—परमेश्वरेण=भगवान् शंकर के द्वारा। प्रदिष्टकाला=निर्दिष्ट भोजन का समय। शोणितपारणा=खून का पारण (व्रत का भोजन)। सुरुद्विषः=राहु के। चान्द्रमसी=चन्द्रसम्बन्धिनी। सुधा इव=अमृत के समान। क्षुधितस्य=भूखे। तृप्त्यै=तृप्ति के लिये। अलम्=पर्याप्त है ॥३९॥

हिन्दी—सिंह कहता है इसलिये यह गाय बुभुक्षायुक्त मेरे लिये भगवान् शिव ने उचित समय पर भेजी है। यह मेरे व्रत-पारण अर्थात् भोजन के लिये पर्याप्त है। जिस प्रकार चन्द्रमा का अमृत राहु के लिये पर्याप्त है ॥३९॥

विशेष—सिंह ने कहा कि यह ईश्वर की इच्छा है, कि इस समय मैं भूखा हूँ और मेरे व्रत का समय है। अतः व्रत करने वाले मेरे लिये इसका रुधिर ही व्रतान्त भोजन है। इसके रुधिर से मैं इस प्रकार तृप्त हो जाऊँगा जिस प्रकार राहु चन्द्र के अमृत का पान करके तृप्त होता है। यहाँ पर व्यक्त किया गया है कि जब समय आ जाता है तब राहु चन्द्रमा को अवश्य ग्रसित कर लेता है उसी प्रकार इस नन्दिनी का भी समय आ गया है। अतः इसकी रक्षा कोई नहीं कर सकता। प्रस्तुत श्लोक में उपमा अलंकार है ॥३९॥

समास—प्रदिष्टकाला=प्रदिष्टः कालः यस्याः सा (बहुव्रीहि स०)। परमेश्वरेण=परमश्चासौ ईश्वरः तेन (कर्मधारयसमास), शोणितपारणा=शोणितस्य पारणा (षष्ठीतत्पुरुष स०) ॥३९॥

व्याकरण—क्षुधितस्य=क्षुधा + इतच्। प्रदिष्ट=प्र + दिश् + क्त। ईश्वरेण=ईश् + वरच्। उपस्थिता=उप + स्था + क्त + टाप्। सुरद्विषः=सुर + द्विष् + क्विप् ॥३९॥

प्रसंग—इसके बाद सिंह राजा को गुरु के आश्रम लौटने की सलाह देता हुआ कहता है—

स त्वं निवर्त्तस्व विहाय, लज्जां गुरोर्भवान् दर्शितशिष्यभक्तिः ।
शस्त्रेण रक्ष्यं यदशक्यरक्ष्यं न तद् यशः शस्त्रभृतां क्षिणोति ॥४०॥

अन्वय—स त्वं लज्जाम् विहाय निर्वतस्व, भवान् गुरोः दर्शितशिष्यभक्तिः यद् रक्ष्यं शस्त्रेण अशक्यरक्ष्यम् तद् शस्त्रभृताम् यशः न क्षिणोति ॥४०॥

संस्कृत टीका—सः=बाहुप्रतिष्टम्भेन किंकर्तव्यविमूढ़ः । त्वं=राजा दिलीपः । लज्जां=मनसिविद्यमानां ग्लानिम्, विहाय=त्यक्त्वा । निर्वतस्व=प्रतिगच्छ, भवान्=त्वम्, गुरोः=वशिष्ठस्य, दर्शितशिष्यभक्तिः=प्रकाशीकृत-श्रद्धः, यद्=किञ्चित्, रक्ष्यं=रक्षितुंयोग्यम् वस्तु । शस्त्रेण=आयुधेन, अशक्य-रक्ष्यम्=असम्भवपरित्राणम्, तत्=रक्ष्यं, शस्त्रभृताम्=आयुधधारिणाम्, यशः=कीर्तिः, न=नहि, क्षिणोति=हिनस्ति ॥४०॥

संस्कृत भावार्थ—सिंहः कथयति—त्वं लज्जां त्यक्त्वा गुरोराश्रमं प्रति निर्वतस्व । गुरुं प्रति शिष्यभक्तिः प्रदर्शिता त्वया । यद् रक्षणीयम् वस्तु केनापि कारणेन शस्त्रधारिणा न रक्ष्यते, तत्र आयुधशालिनां कीर्तिः न नष्टा भवति ॥४०॥

शब्दार्थ—लज्जाम्=लज्जा को । विहाय=छोड़कर । निर्वतस्व=लौट जाओ । दर्शितशिष्यभक्तिः=शिष्यभक्ति दिखा दी है । रक्ष्यम्=रक्षा के योग्य । अशक्यरक्ष्यम्=रक्षा करने में असमर्थ । शस्त्रभृताम्=शस्त्रधारियों का । न क्षिणोति=क्षीण नहीं होता ॥४०॥

हिन्दी– इस प्रकार बाहु के बन्ध जाने के कारण तुम अपने मन की ग्लानि को छोड़कर लौट जाओ । तुमने अपने गुरु के प्रति भक्ति दिखा दी है । जो रक्षा के योग्य वस्तु शस्त्र से रक्षा नहीं की जा सकती है उसके नष्ट होने पर भी शस्त्रधारियों का यश नष्ट नहीं होता है ॥४०॥

विशेष—'आप इस गाय की रक्षा में नियुक्त थे, परन्तु इसको नहीं बचा सके' । इस ग्लानि को मन से निकाल कर वापस लौट जाओ । आपने अनेक प्रकार से गाय का अनुकरण कर गुरु के प्रति शिष्य की श्रद्धा प्रकट कर दी है । आपने इतनी सेवा की है कि आपके गुरु का कोई अपमान नहीं है ।

इस गाय की रक्षा न कर सकने के कारण आपका यश क्षीण नहीं होगा, क्योंकि आप शस्त्रों के प्रयोग से ही इसकी रक्षा करने में समर्थ है, परन्तु शिव जी की कृपा से कोई हथियार काम नहीं देगा। अत: आप नि:संकोच लौट जाइये। प्रस्तुत श्लोक में 'आपको लज्जा नहीं करनी चाहिये' इस सामान्य का समर्थन, 'शस्त्रों द्वारा जिसकी रक्षा नहीं की जा सकती उसके विनाश से शस्त्रधारियों के यश को क्षीण नहीं होता' इस विशेष से किये जाने के कारण अर्थान्तरन्यास अलंकार है ॥४०॥

समास—दर्शितशिष्यभक्ति:=दर्शिता शिष्यस्य भक्ति: येन स: (बहुव्रीहि समास) ॥४०॥

व्याकरण—लज्जाम्=विहाय=वि+हा+क्त्वा (ल्यप्)। निर्वतस्व=नि+वृत्+लोट् म० पु० ए० व०। भक्ति:=भज्+क्तिन्। शस्त्रेण=शस्+ष्ट्रन्। रक्ष्यम्=रक्ष+यत्। शस्त्रभृताम्=शस्त्र+भृ+क्विप् षष्ठी०। क्षिणोति=क्षि+लट् प्र०पु०ए०व० ॥४०॥

प्रसंग—इस प्रकार के सिंह के वचन को सुनकर राजा की दशा का वर्णन करते हुये महाकवि कहते हैं—

इति प्रगल्भं पुरुषाधिराजो मृगाधिराजस्य वचो निशम्य ।
प्रत्याहतास्त्रो गिरिशप्रभावादात्मन्यवज्ञां शिथिलीचकार ॥४१॥

अन्वय—पुरुषाधिराज: मृगाधिराजस्य इति प्रगल्भं वच: निशम्य गिरिश-प्रभावात् प्रत्याहतास्त्र: सन् आत्मनि अवज्ञाम् शिथिलीचकार ॥४१॥

संस्कृत टीका—पुरुषाधिराज:=नराणाम् अधिपति: महाराज: दिलीप:, मृगाधिराजस्य=मृगाणाम् ईश्वरस्य सिंहस्य, इति=पूर्वोक्तप्रकारम्, प्रगल्भम्=धृष्टम्, वच:=वचनम्, निशम्य=श्रुत्वा, गिरिशप्रभावात्=भगवत: शंकरस्य सामर्थ्यात्, प्रत्याहतास्त्र:=कुण्ठितायुध:, आत्मनि=स्वस्मिन्, अवज्ञाम=अपमानम्, शिथिलीचकार=शिथिलाम् कृतवान् ॥४१॥

संस्कृत भावार्थ—सिंहस्य वचनं श्रुत्वा राजा दिलीप: निश्चितम् कृतवान्, यत् मम बाहो: प्रतिस्तब्धे शिवस्य प्रताप एव कारणम् कापि शक्ति-रन्या ममास्त्रम् प्रतिरोद्धुं न समर्था अस्ति। अत: सिंहवधेऽशक्त: राजा स्वकीयामवज्ञां तत्याज ॥४१॥

शब्दार्थ—पुरुषाधिराज:=राजा दिलीप। मृगाधिराजस्य=मृगराज सिंह

के। प्रगल्भम्=धृष्ट। वचः=वचन को। निशम्य=सुनकर। गिरिशप्रभावात्=भगवान् शिव के प्रभाव से। प्रत्याहतास्त्रः=अवरुद्ध अस्त्र वाले। अवज्ञाम्=अपमान को। शिथिलीचकार=शिथिल कर दिया, भूल गया ॥४१॥

हिन्दी—राजा दिलीप पूर्वोक्त प्रकार के सिंह के धृष्ट वचनों को सुनकर शंकर के प्रभाव से मेरा अस्त्र कुण्ठित हो गया है, ऐसा निश्चय कर अपने अपमान को कम समझा ॥४१॥

विशेष—राजा दिलीप ने सिंह के पूर्वप्रकार से कहे गये धृष्ट वचनों को सुनकर यह समझ लिया कि मेरे हथियार रुकने का कारण शिवजी का प्रभाव है न कि मेरी कमजोरी। अतः राजा ने उसको अपमान नहीं समझा। क्योंकि क्षत्रियों के हथियार बराबर वालों के ऊपर प्रभाव दिखाते हैं न कि ईश्वरीय शक्तियों पर। अतः राजा ने अपने अपमान को कम कर दिया। प्रस्तुत श्लोक में राजा ने अपने प्रति किये जाने वाले अपमान को शिथिल कर दिया इस कार्य का हेतु शिव का उत्कृष्ट प्रभाव प्रस्तुत किये जाने के कारण यहाँ हेतु अलंकार है ॥४१॥

समास—पुरुषाधिराजः=पुरुषाणाम् अधिराजः (षष्ठीतत्पुरुष स०)। प्रत्याहतास्त्रः=प्रत्याहतम् अस्त्रं यस्य सः (बहुव्रीहि स०) ॥४१॥

व्याकरण—प्रगल्भम्=प्र+गल्भ+अच्। अधि+राजन्+टच्। निशम्य=नि+शम्+क्त्वा (ल्यप्) प्रत्याहतः=प्रति+आ+हन्+क्त। अस्त्र=अस्+ष्ट्रन्। प्रभावः=प्र+भू+घञ्। अवज्ञाम्=अव+ज्ञ+क+टाप्। चकार=कृ+लिट् प्र०पु०ए०व० ॥४१॥

प्रसंग—सिंह के पूर्वोक्त धृष्ट वचनों को सुनकर राजा दिलीप सिंह से कहते हैं—

> प्रत्यब्रवीच्चैनमिषुप्रयोगे, तत्पूर्वभङ्गे वितथप्रयत्नः।
> जडीकृतस्त्र्यम्बकवीक्षणेन वज्रं मुमुक्षन्निव वज्रपाणिः ॥४२॥

अन्वय—तत्पूर्वभगे इषुप्रयोगे वितथप्रयत्नः वज्रं मुमुक्षन् त्र्यम्बकवीक्षणेन जडीकृतः वज्रपाणिः इव एनम् प्रत्यब्रवीत् ॥४२॥

संस्कृत टीका—तत्पूर्वभङ्गे=प्रथमपराजये, इषुप्रयोगे=बाणस्य प्रहारे, वितथप्रयत्नः=विफलप्रयासः, वज्रम्=कुलिशम्, मुमुक्षन्=प्रहातुमिच्छन्,

त्र्यम्बकवीक्षणेन=शिवस्य अवलोकनेन, जडीकृतः=निष्पन्दीकृतः, वज्रपाणिः=इन्द्र इव, नृपः=राजा दिलीपः, एनम्=सिंहम्, प्रत्यब्रवीत्=अवदत् ॥४२॥

संस्कृत भावार्थ—बाणप्रहारेऽसफलप्रयत्नः वज्रं मोक्तुमिच्छन् किन्तु शिवस्य दृष्ट्या निष्पन्दीकृतः, सः वज्रपाणि इन्द्र इव स्थितः राजा दिलीपः सिंहम् उक्तवान् ॥४२॥

शब्दार्थ—तत्पूर्वभङ्गे=प्रथम बार भंग हुये। इषुप्रयोगे=बाण के प्रयोग में। वितथप्रयत्नः=निष्फल प्रयत्न वाले। मुमुक्षन्=छोड़ने की इच्छा करते हुये। त्र्यम्बकवीक्षणेन=भगवान् शिव के देखने से। जड़ीकृतः=निश्चेष्ट किये गये। वज्रपाणिः=इन्द्र। प्रत्यब्रवीत्=कहा ॥४२॥

हिन्दी—सर्वप्रथम बाण चलाने में निष्फल प्रयत्न वाले वज्र को छोड़ने की इच्छा रखते हुये, किन्तु शंकर के अवलोकन मात्र से जड़ीभूत इन्द्र के समान राजा दिलीप सिंह से कहने लगे ॥४२॥

विशेष—प्रथम बार ही सिंह पर ही बाण चलाने में असफल राजा दिलीप शिवजी द्वारा निश्चेष्ट बनाये गये वज्रपाणि इन्द्र के समान स्थित रहे राजा दिलीप का बाण जीवन में प्रथम बार ही किसी पर प्रयोग किये जाने के समय असफल हुआ था और किसी पर नहीं। जैसे वज्र के कुण्ठित हो जाने पर इन्द्र की जो दशा थी वह दशा राजा की हो गई थी। महाभारत में भी ऐसा वृत्त आया है कि "बाहुम् सवज्रम् शक्रस्य क्रुद्धस्यास्तम्भयत्प्रभुः"। प्रस्तुत श्लोक में राजा उपमेय, इन्द्र उपमान, हाथ का जड़ होना साधारण धर्म, और इव उपमा का वाचक होने से उपमा अलंकार है।

समास—इषुप्रयोगे=इषोः प्रयोगे (षष्ठीतत्पुरुष स०) तत्पूर्वभङ्गे=स एव पूर्वभंगः यस्य सः (बहुव्रीहि स०), त्र्यम्बकवीक्षणेन=त्र्यम्बकस्य वीक्षणेन (षष्ठीतत्पुरुष) वज्रपाणिः=वज्रं पाणौ यस्य सः (बहुव्रीहि स०) ॥४२॥

व्याकरण—प्रयोगे=प्र+युज्+घञ्। जड़ीकृतः=जड+च्वि+कृ+क्त। वीक्षण=वि+ईक्ष्+(अन)। मुमुक्षन्=मुच्+सन्+शतृ। प्रत्यब्रवीत्=प्रति+ब्रू+लङ् प्र० पु० ए० व० ॥४२॥

प्रसंग—दिलीप सिंह से कहते हैं—

संरुद्धचेष्टस्य मृगेन्द्र ! कामं हास्यं वचस्तद्यदहं विवक्षुः ।
अन्तर्गतं प्राणभृतां हि वेद सर्वं भवान् भावमतोऽभिधास्ये ॥४३॥

अन्वय—मृगेन्द्र ! संरुद्धचेष्टस्य तद् वचः कामं हास्यम् यत् अहम् विवक्षुः हि भवान् प्राणभृताम् अन्तर्गतं सर्वम् भावम् वेद, अतः अभिधास्ये ॥४३॥

संस्कृत टीका—हे मृगेन्द्र ?= मृगराज ! संरुद्धचेष्टस्य = प्रतिबद्धव्यापारस्य । मम=राज्ञः दिलीपस्य, तद्वचः=अग्रे वक्ष्यमाणा वाणी, काम्=निश्चयेन, हास्यम्=परिहसनीयम्, यद्=वचः, अहं=राजा दिलीपः, विवक्षुः=कथयितुमिच्छुः, हि=यतः, भवान्=त्वम्, प्राणभृताम्=जीवानाम्, अन्तर्गतं=हृदयस्थं, सर्वं=सम्पूर्णम्,भावं=अभिप्रायं वेद=जानाति, अतः= अस्मात् कारणात्, अभिधास्ये=कथयिष्यामि ॥४३॥

संस्कृत भावार्थ—राजा दिलीपः=सिंहं कथयति यत् हे मृगेन्द्र ! सम्प्रति बाहोः प्रतिस्तब्धेन मदीया चेष्टा संरुद्धा जाता अस्ति । अहं किञ्चिदपि कर्तुं न समर्थोऽस्मि । यत्किञ्चिदपि भवतः अग्रे वक्ष्यामि तद् अवश्यमेव उपहसनीयं स्यात् । परन्तु अहं अवश्यमेव कथयिष्यामि यत् भवान् प्राणिनाम् अन्तंगतं सर्वं भाव जानाति । अत्र सिंहस्य दैवत्वं सूचितमस्ति ॥४३॥

शब्दार्थ—मृगेन्द्र=मृगराज । संरुद्धचेष्टस्य=अवरुद्ध चेष्टा वाले । वचः =वचन (कथन) । हास्यम्=उपहास के योग्य । विवक्षुः=कहने का इच्छुक । भवान्=आप । प्राणभृताम्=प्राणियों के । अन्तर्गतम्=भीतर की । वेद= जानते हैं । अतः=इसलिये । अभिधास्ये=कहूँगा ॥४३॥

हिन्दी—हे मृगराज । अवरुद्ध चेष्टा वाला मैं जो कुछ कहना चाहता हूँ, वह मेरा वचन अवश्य ही उपहास के योग्य है । फिर भी मैं अवश्य कहना चाहता हूँ क्योंकि आप [illegible] जीवों के हृदयगत भाव को जानते हैं ॥४३॥

विशेष—राजा ने कहा कि मैं शिवजी के प्रभाव से चेष्टारहित हो गया हूँ । इसलिये इस समय मेरे मुंह से निकले हुये वाक्य अवश्य ही उपहास के योग्य होंगे । परन्तु फिर भी मैं जो कुछ कहना चाहता हूँ, अवश्य कहूँगा; क्योंकि आप देवस्वरूप है और सबके हृदय की बात को जानते हैं ॥४३॥

समास—संरुद्धचेटस्य=संरुद्धा चेष्टा यस्य सः (बहुव्रीहि)। मृगेन्द्रः=मृगाणाम् इन्द्रः (षष्ठीतत्पुरुष) ॥४३॥

व्याकरण—वचः=वच्+असुन्। हास्यम्=हस्+ण्यत्। विवक्षुः=वच्+सन्+उ। प्राणभृताम्=प्राण+भृ+क्विप्। वेद=विद्+लिट्+प्र० पु० ए० व०। अभिधास्ये=अभि+धा+लृट् उ० पु० ए० व० ॥४३॥

प्रसंग—यद्यपि मेरा वचन उपहासास्पद है फिर भी सामने नष्ट होते हुये गुरु के धन की उपेक्षा नहीं की जा सकती, इस प्रकार राजा कहते हैं—

मान्यः स मे स्थावरजङ्गमानां सर्गस्थितिप्रत्यवहारहेतुः।
गुरोरपीदं धनमाहिताग्नेर्नश्यत् पुरस्तादनुपेक्षणीयम् ॥४४॥

अन्वय—स्थावरजङ्गमानाम् सर्गस्थितिप्रत्यवहारहेतुः स मे मान्यः, पुरस्तात् नश्यत् अहिताग्नेः गुरोः अपि इदम् धनम् अनुपेक्षणीयम् ॥४४॥

संस्कृत टीका—स्थावरजङ्गमानाम्=चराचराणाम्, सर्गस्थितिप्रत्यवहारहेतुः=सृष्टिपालनविनाशकर्त्ता, सः=शिवः, मे=मम, मान्यः=पूजनीयः, आहिताग्नेः=स्थापिताग्नित्रयस्य, गुरोः=वशिष्ठस्य, अपि=समुच्चये, इदंधनम्=नन्दिनीरूपगोधनम्, पुरस्तात्=मम सम्मुख एव, नश्यत्=विनश्यत्, अनुपेक्षणीयम्=उपेक्षितुम् नास्ति ॥४४॥

संस्कृत भावार्थ—राजा दिलीपः सिंहं प्रति कथयति यत् यद्यपि सर्वेषाम् चराचराणां सृष्टिस्थितिप्रलयकारकस्य तस्याज्ञा शिरोधार्या वर्तते, परन्तु मम सम्मुख एव गुरोः वशिष्ठस्य पुरो नश्यन्ती धेनुरियं अनुपेक्षणीया वर्तते ॥४४॥

शब्दार्थ—स्थावरजङ्गमानाम्=चर और अचर पदार्थों के। सर्गस्थितिप्रत्यवहारहेतुः=सृष्टि, रक्षा और प्रलय के कारण। मान्यः=पूज्य। पुरस्तात्=सामने। नश्यत्=नष्ट होता हुआ। अहिताग्नेः=अग्निहोत्र करने वाले। गुरोः=वशिष्ठ का। इदं धनम्=गोरूप यह धन। अनुपेक्षणीयम्=उपेक्षा के योग्य नहीं है ॥४४॥

हिन्दी—चर और अचर, समस्त सृष्टि के उत्पत्ति पालन और नाश को करने वाले शिवजी की आज्ञा मुझे शिरोधार्य है। परन्तु तीन अग्नियों की

स्थापना करने वाले गुरु वशिष्ठ के इस गो-धन की जो मेरे सम्मुख ही नष्ट हो रहा है, उसकी उपेक्षा नहीं की जा सकती ॥४४॥

विशेष—राजा ने कहा कि हे सिंह ? आपका पूर्व कथन सत्य है। सृष्टि की रचना, पालन और संहार करने वाले शिव की आज्ञा मुझे परमादरणीय है, परन्तु मेरे गुरु के अग्निहोत्र यज्ञों को पूर्ण करने वाली यह गाय सुरक्षा में आयी है। इसको अपनी आखों के सामने नष्ट होते हुये भी मैं नहीं देख सकता। यहाँ राजा के सामने दोनों ओर से ही कठिन समस्या का उल्लेख किया गया है ॥४४॥

समास—स्थावरजङ्गमानाम्=स्थावराश्च जंगमाश्च तेषाम् (द्वन्द्व स०) सर्गस्थितिप्रत्यवहारहेतुः=सर्गश्च स्थितिश्च प्रत्यवहारश्च (द्वन्द्व) तेषाम् हेतुः (षष्ठीतत्पुरुष)। अनुपेक्षणीयम्=न उपेक्षणीयम् (नञ् तत्पुरुष)। आहिताग्नेः =आहिताः अग्नयः येन स तस्य (बहुव्रीहि स०) ॥४४॥

व्याकरण—सर्ग=सृज्+घञ्। स्थिति=स्था+क्तिन्। प्रत्यवहार= प्रति+अव+हृ+घञ्। नश्यत्=नश्+शतृ। उपेक्षणीयम्=उप+ईक्ष्+ अनीयर् ॥४४॥

प्रसंग—इसके बाद राजा अपना शरीर सिंह को अर्पित कर गाय को छुड़ाने के लिये प्रार्थना करता है—

स त्वं मदीयेन शरीरवृत्तिं देहेन निर्वर्तयितुं प्रसीद।
दिनावसानोत्सुकबालवत्सा विसृज्यतां धेनुरियं महर्षेः ॥४५॥

अन्वय—स त्वम् मदीयेन देहेन शरीरवृत्तिम् निर्वर्तयितुम् प्रसीद दिनावसानोत्सुकबालवत्सा महर्षेः इयम् धेनुः विसृज्यताम् ॥४५॥

संस्कृत टीका—सः=अङ्कागतसत्त्ववृत्तिः। त्वम्=सिंहः, मदीयेन=मामकेन देहेन=शरीरेण, शरीरवृत्तिम्=शरीरजीविकाम्, निर्वर्तयितुम्=सम्पादयितुम्, प्रसीद=प्रसन्नो भव। दिनावसानोत्सुकबालवत्सा=दिनान्ते उत्कण्ठितबालवत्सा, महर्षेः=वशिष्ठस्य, इयम्=पुरोदृश्यमाना, धेनुः=गौः, विसृज्यताम्= मुच्यताम् ॥४५॥

संस्कृत भावार्थ—राजा सिंहं प्रति कथयति—हे मृगेन्द्र ! त्वं मदीयेन शरीरेण जीवनवृत्तिं सम्पादय। किन्तु सांयकाले समुत्सुकवत्सा महर्षेः वशिष्ठस्य इयं धेनुः विमुच्यताम् ॥४५॥

शब्दार्थ—मदीयेन=मेरे। देहेन=शरीर से। शरीरवृत्तिम्=शरीर-निर्वाह। निर्वर्तयितुम्=पूर्ण करने के लिये। प्रसीद=प्रसन्न हो। दिनावसानोत्सुकबालवत्सा=संध्या के समय बछड़े के लिये उत्सुक। इयं धेनुः=इस गाय को। विसृज्यताम्=छोड़ दो ॥४५॥

हिन्दी—हे मृगराज ! तुम मेरे शरीर से अपने जीवन का निर्वाह करलो। किन्तु दिन की समाप्ति पर उत्कण्ठित बछड़े वाली महर्षि वशिष्ठ की इस गाय को छोड़ दो ॥ ४५ ॥

विशेष—भाव यह कि गोरक्षक राजा सिंह से कहता है कि आप अपनी भूख की शान्ति मेरे शरीर के द्वारा करें। क्योंकि आपका यह नियम है कि यहाँ आये हुये जीव का भक्षण करते हैं अतः इस गाय के बदले मुझे खा लीजिए। और इस गाय को छोड़ दीजिये। क्योंकि यह महर्षि वशिष्ठ की गाय है और संध्या के समय इसका बछड़ा अपनी माँ के लिये उत्सुक होगा। प्रस्तुत श्लोक में सिंह के हृदय में करुणा जागृत करने हेतु "दिनावसानोत्सुकबालवत्सा" गाय का विशेषण साभिप्राय प्रयुक्त होने का कारण परिकर अलंकार है। ४५।

समास—दिनावसानोत्सुकबालवत्सा=दिनस्य अवसाने उत्सुकः बालवत्सः यस्याः सा (बहुव्रीहि स०)

व्याकरण—मदीयेन=अस्मद्+छ (ईय वृत्तिम्=वृत्+क्तिन्। निर्वर्तयितुम्=नि+वृत्+णिच्+तुमुन्। प्रसीद=प्र+षद्+लोट् म० पु० ए० व०। विसृज्यताम्=वि+सृज्+लोट् प्र० पु० ए० व० ॥४५॥

प्रसंग—जब राजा दिलीप गाय के बदले अपने शरीर को अर्पित करने को तैयार हो जाते हैं तब सिंह हँसते हुये कहता है—

> अथान्धकारं गिरिगह्वराणां दंष्ट्रामयूखैः शकलानि कुर्वन्।
> भूयः स भूतेश्वरपार्श्ववर्ती किञ्चिद् विहस्यार्थपतिं बभाषे ॥४६॥

अन्वय—अथ भूतेश्वरपार्श्ववर्ती सः गिरिगह्वराणाम् अन्धकारम् दंष्ट्रामयूखैः शकलानि कुर्वन् किञ्चिद् विहस्य अर्थपतिम् भूयः बभाषे ॥४६॥

संस्कृत टीका—अथ=राज्ञः वचनश्रवणानन्तरम्, भूतेश्वरपार्श्ववर्ती=शंकरस्य निकटवर्त्ती, सः=सिंहः। गिरिगह्वराणाम्=पर्वतकन्दराणाम्,

अन्धकारम्=तिमिरम्, दंष्ट्रामयूखैः=दन्तानां किरणैः। शकलानि=खण्डानि, कुर्वन्=विदधत्, किञ्चिद्=स्वल्पम्, विहस्य=हास्यं कृत्वा, भूयः=पुनः अर्थपतिम्=राजानम्, बभाषे=उक्तवान् ॥४६॥

संस्कृत भावार्थ—राज्ञः वचनश्रवणनन्तरं सिंहः स्वकीयदन्तकिरणैः गिरिगह्वराणाम् अन्धकारम् खण्डयन् तस्योपरिविहसन् राजा दिलीप पुनः प्रावोचत्।

शब्दार्थ—भूतेश्वरपार्श्ववर्त्ती=भगवान् शिव के समीवर्त्ती अनुचर। गिरिगह्वरणाम्=पर्वत के कन्दराओं के। दंष्ट्रामयूखैः=दाढ़ की किरणों से। शकलानि कुर्वन्=टुकड़े-टुकड़े करते हुये। किञ्चित्=कुछ। विहस्य=हँसकर। अर्थपतिम्=राजा से। बभाषे=बोला ॥४६॥

हिन्दी—इसके पश्चात् भगवान् शंकर के समीप रहने वाला वह सिंह अपने दाँतों की चमक से पर्वत के गुफाओं के अन्धकार के टुकड़े-टुकड़े करता हुआ कुछ हँसी के साथ राजा दिलीप से पुनः कहने लगा ॥४६॥

विशेष—गाय को अपने शरीर का अर्पण करने वाले राजा की बात को सुनकर सिंह कुछ हँसा। जब हँसने के लिये सिंह ने मुँह खोला तो उसके दाँत ऐसे चमके कि जिनकी चमक से गुफाओं का अन्धेरा नष्ट हो गया ॥४६॥

समास—गिरिगह्वराणाम्=गिरेः गह्वराणाम् (षष्ठीतत्पुरुष)। दंष्ट्रामयूखैः=दंष्ट्राणाम् मयूखैः (षष्ठी तत्पुरुष)। भूतेश्वरपार्श्ववर्ती=भूतानाम् ईश्वरस्य पार्श्ववर्त्ती (षष्ठीतत्पुरुष)। अर्थपतिम्=अर्थस्य पतिम् (षष्ठीतत्पुरुष) ॥४६॥

व्याकरण—अन्धकार=अन्ध+कृ+घञ्। गह्वराणाम्=गह्+वरच्। दंष्ट्रा=दश्+ष्ट्रन+टाप्। कुर्वन्=कृ+शतृ। पार्श्ववर्त्ती=पार्श्व+वृत्+इनि। विहस्य=वि+हस्+क्त्वा (ल्यप्) बभाषे=भाष्+लिट् प्र० पु० ए० व० ॥४६॥

प्रसंग—सिंह राजा के उक्त प्रस्ताव का उपहास करते हुये कहता है—

एकातपत्रं जगतः प्रभुत्वं नवं वयः कान्तमिदं वपुश्च।
अल्पस्य हेतोर्बहु हातुमिच्छन् विचारमूढः प्रतिभासि मे त्वम् ॥४७॥

अन्वय—एकातपत्रम् जगतः प्रभुत्वम् नवम् वयः इदम् कान्तिम् वपुः च, अल्पस्य हेतोः बहु हातुम् इच्छन् त्वम् मे विचारमूढ़ः प्रतिभासि ॥४७॥

संस्कृत टीका—एकातपत्रम्=एकछत्रम्, जगतः=संसारस्य, प्रभुत्वम्=स्वामित्वम्, नवम्,=नवीनम्, वयः=आयुः, कान्तम्=सुन्दरम्। इदम्=पुरोदृश्यमानम्, वपुः=शरीरम्, अल्पस्य=स्वल्पस्य, हेतोः=कारणात्, बहु=अत्यधिकम्, हातुम्=त्यक्तुम्, त्वम्=राजादिलीपः मे=मम, विचारमूढः=कर्तव्याकर्त्तव्ये मूर्खः। प्रतिभासि=प्रतीयसे ॥४७॥

संस्कृत भावार्थ—सिंहः राजानं प्रति कथयति—हे राजन्? तव एकच्छत्रं राज्यम् अवस्थापि नातिदीर्घा, शरीरमपि अत्यन्त सौम्यमस्ति। अतः त्वं अल्पमूल्यायाः धेनोः कृते स्वशरीरं समर्थयन् विमूढः प्रतिभासि ॥३७॥

शब्दार्थ—एकातपत्रम्=एक छत्र। जगतः=संसार का। प्रभुत्वम्=अधिकार, राज्य। नवं वयः=नयी अवस्था। कान्तम्=सुन्दर। वपुः=शरीर। अल्पस्य हेतोः=थोड़े के कारण। हातुम्=छोड़ने की। इच्छन्=इच्छा करते हुये। मे=मुझे। विचारमूढः=विवेकहीन। प्रतिभासि=मालूम पड़ते हो ॥४७॥

हिन्दी—संसार का एकछत्र स्वामित्व और नवीन आयु तथा सुन्दर शरीर इन सब को थोड़ी सी वस्तु की रक्षा के लिये नष्ट करने को तैयार तुम मुझे विचारों से मूर्ख प्रतीत होते हों ॥४७॥

विशेष—ससार में तुम्हारा एकछत्र राज्य है, उस पर भी तुम बुड्ढ़े या मृत्यु के निकट वय वाले नहीं हो, अपितु तुम्हारी नयी उम्र है, तुम्हारा शरीर भी अत्यन्त सुन्दर है। इन सब वैभवों को एक साधारण सी गाय के बदले त्यागने के लिये जो तुम उद्यत हो, इससे मुझे लगता है कि तुम बिलकुल ही विवेकहीन हो।

प्रस्तुत श्लोक में 'मुझे विचारमूढ लगते हो' इस कथन का समर्थन 'थोड़े के लिए बहुत का नाश करने के इच्छुक' इस कथन द्वारा किये जाने के कारण काव्यलिंग अलंकार है ॥४७॥

समास—एकातपत्रम्=एकम् आतपत्रम् यस्मिन् तत् (बहुव्रीहि.)। विचारमूढ़ः=विचारे मूढः (सप्तमीतत्पुरुष, ॥४७॥

व्याकरण—आतप + त्रा + क =आतपत्र। प्रभुत्वम्=प्रभु+त्वल्। कान्त=कमु+क्त। अल्पस्य हेतोः (षष्ठी विभक्ति) हातुम्=हा+तुमुन्। इच्छन्=इष्+शतृ। प्रतिभासि=प्रति+भा+लट् प्र० पु० ए० व० ॥४७॥

प्रसंग—यदि तुम इतने सब वैभव को राजा होने के कारण प्राणियों पर दया भाव दिखाते हुये त्यागना चाहते हो तो यह भी उचित नहीं है—

भूतानुकम्पा तव चेदियं गौरेकाभवेत्स्वस्तिमती त्वदन्ते ।
जीवन्पुनः शश्वदुपप्लवेभ्यः प्रजाः प्रजानाथ पितेव पासि ॥४८॥

अन्वय—तव भूतानुकम्पा चेत्, त्वदन्ते इयम् एका गौः स्वस्तिमती भवेत् हे प्रजानाथ । जीवन् पुनः पिता इव प्रजाः उपप्लवेभ्यः शश्वत् पासि ॥४८॥

संस्कृत टीका:–चेत्=यदि, तव=भवतः, भूतानुकम्पा=प्राणिदया । त्वदन्ते =तव विनाशे सति, इयम्=एषा पुरो दृश्यमाना, एका=एकसंख्यामात्रा, गौः=धेनुः, स्वस्तिमती=कल्याणयुक्ता, भवेत्=स्यात्, प्रजनाथ?=हे राजन् ? दिलीपः, पुनः=मुहुः, जीवन्=प्राणम् धारयत्,पिता इव=जनक इव,प्रजाः= लोकाः । शश्वत्=निरन्तरम्, उपप्लवेभ्यः=उपद्रवेभ्यः । पासि=रक्षसि ।४८॥

संस्कृत भावार्थ—सिंहः कथयति—हे राजन् । धेनोः रक्षणार्थं स्वशरीरं एवं विचार्य समर्पयसि यत् प्राणिषु दया तव कर्त्तव्यमस्ति तदपि नोपयुक्तम यतः तव शरीरे नष्टे सति इयमेका नन्दिनी एव कल्याणवती भविष्यति यदि जीवन धारयसि तर्हि बहूनां प्रजानां विविधोपद्रवेभ्यः रक्षां करिष्यसि ॥४८॥

शब्दार्थ—भूतानुकम्पा=जीवों पर दया । त्वदन्ते=आपके न रहने पर। इयम्=यह। एका गौः=अकेली गाय । स्वस्तिमती=कल्याणयुक्ता । प्रजानाथ =प्रजापालक । जीवन=जीवित रहते हुये। पिता इव=पिता के समान। प्रजाः = प्रजाओं । उपप्लवेभ्यः=उपद्रवों से । शश्वत्=सदैव । पासि=रक्षा करोगे ॥४८॥

हिन्दी—यदि तुम्हारी जीवों पर दया है तो तुम्हारे समाप्त होने पर एक यही धेनु कल्याणमती होगी । परन्तु हे प्रजा के स्वामी प्राणों को धारण करते हुये तुम पिता के समान जनता की निरन्तर उपस्थित होने वाले उपद्रवों से रक्षा करते हो ॥४८॥

विशेष—सिंह ने कहा कि तुम अपने शरीर को यह विचार कर त्यागने के लिये उद्यत हो कि तुम प्राणियों पर दया-भाव रखते हो तब भी ठीक नहीं है । क्यों कि तुम्हारे शरीर का नाश होने पर केवल इस नन्दिनी गाय का भला होगा । परन्तु अन्य समस्त शरीर का जनता एवं जन्तुवर्ग को विशेष

दुःख पहुँचेगा। क्योंकि तुम उनकी हमेशा आने वाले उपद्रवों से रक्षा करते हो। तुम्हारे मर जाने पर उनकी रक्षा कौन करेगा? अतः इसके कारण तुम्हारा मरण उचित नहीं होगा। प्रस्तुत श्लोक में उपमा अलंकार है। पिता उपमान, प्रजानाथ उपमेय, उपद्रवों से रक्षा करना साधारण धर्म तथा इव उपमा का वाचक है ॥४८॥

समास—भूतानुकम्पा=भूतेषु अनुकम्पा (सप्तमी तत्पुरुष) प्रजानाथ ?=प्रजानां नाथः (षष्ठी तत्पुरुष) ॥४८॥

व्याकरण—अनुकम्पा=अनु+कम्प्+अच्+टाप्। भवेत्=भू+लिङ् प्र० पु० ए० व०। स्वस्तिमती=स्वस्ति+मतुप्+ङीप्। जीवन्=जीव+शतृ। उपप्लव=उप+प्लु+अच्। पासि=पा+लट् म० पु० ए० व० ॥४८॥

प्रसंग—इसके बाद सिंह कहता है कि भूतों पर दयादृष्टि के विचार से तुम्हारा मरण उचित नहीं है। क्यों कि तुम करोड़ों गायें देकर गुरु को प्रसन्न कर सकते हो—

अथैकधेनोरपराधचण्डाद् गुरोः कृशानुप्रतिमाद् बिभेषि।
शक्योऽस्य मन्युर्भवता विनेतुं गाः कोटिशः स्पर्शयता घटोध्नीः॥४९।

अन्वय—अथ एकधेनोः अपराधचण्डात् कृशानुप्रतिमाद् गुरोः बिभेषि, अस्य मन्युः कोटिशः घटोध्नीः गाः स्पर्शयता भवता विनेतुं शक्यः ॥४९॥

संस्कृत टीका—अथ=अथवा, एकधेनोः=केवलनन्दिन्या, अपराधचण्डात्=अरक्षणापराधेन अत्यन्तकुपितात्, कृशानुप्रतिमात्=वह्नितुल्यात्, गुरोः=वशिष्ठात्, बिभेषि=भयं करोषि, तर्हि अस्य=गुरोः वशिष्ठस्य, मन्युः=क्रोधः, कोटिशः=असँख्याः, घटोध्नीः=कुम्भतुल्यः विशालदुग्धाशयाः, गाः=धेनवः, स्पर्शयता=ददता, भवता=त्वया, विनेतुम्=दूरीकर्तुम्, शक्यः=सम्भवः ॥४९॥

संस्कृत भावार्थ—सिंहः कथयति—यत् हे राजन्? यदि त्वं नन्दिन्या अरक्षणात् अग्निसदृशात् गुरोः बिभेषि तदपि नोपयुक्तम्। यतः भवता कोटिशः गाः प्रदाय गुरुम् विनेतुं शक्यते ॥४९॥

शब्दार्थ—एकधेनोः=एकगाय के। अपराधचण्डात्=अपराध से क्रोधित।

कृशानुप्रतिमात्=अग्नि के समान तेजस्वी। बिभेषि=डरते हो। मन्युः=क्रोध। घटोध्नीः=घड़ो दूध देने वाली। कोटिशः=करोड़ो। गाः=गायों को। स्पर्शयता=देने से। विनेतुम्=दूर करने के लिये। शक्यः=समर्थ है ॥४९॥

हिन्दी—हे राजन्! इस एक गाय की रक्षा न करने के अपराध से अत्यन्त क्रुद्ध होने वाले अग्नि के समान गुरु वशिष्ठ के भय करते हो तो गुरु के क्रोध को घड़े के समान विशाल थन वाली करोड़ों गायों को देकर तुम दूर कर सकते हो ॥४९॥

विशेष—सिंह ने कहा यदि स्वयम् को मुझे इसलिए प्रस्तुत कर रहे हो कि इस गाय की रक्षा न कर सकने के कारण अग्नि के समान तेजस्वी गुरु वशिष्ठ अत्यन्त नाराज होकर शाप दे देंगे तो इसका भय तुम्हें नहीं करना चाहिये; क्योंकि आप एकच्छत्र राजा हैं और इस एक गाय के बदले में गुरु को अधिक दूध देने वाली असंख्य गायें देकर प्रसन्न कर सकते हैं। प्रस्तुत श्लोक में "कृशानुप्रतिमाद्" तथा 'घटोध्नीः' में उपमा अलंकार है।

समास—अपराधचण्डात्=अपराधे चण्डात् (सप्तमी तत्पुरुष)। एकधेनोः=एका धेनुः यस्य सः तस्मात् (बहुव्रीहि)। कृशानुप्रतिमात्=कृशानुः प्रतिमा यस्य सः तस्मात् (बहुव्रीहि)। घटोध्नीः=घटा इव ऊधांसि यासां ताः (बहुव्रीहि) ॥४९॥

व्याकरण—अपराध=अप+राध्+घञ् (अ)। बिभेषि=भी लट् म० पु० ए० व०। शक्यः=शक्+यत्। विनेतुम्=वि+नी+तुमुन्। स्पर्शयता=स्पर्श+णिच्+शतृ। 'गुरोः बिभेषि' इस उदाहरण में 'गुरोः' में "भीत्रार्थानां भयहेतुः" से पंचमी है ॥४९॥

प्रसंग—इसके बाद सिंह राजा को अपने शरीर की रक्षा करने का उपदेश देते हुये कहता है—

> तद्रक्ष कल्याणपरम्पराणां भोक्तारमूर्जस्वलमात्मदेहम्।
> महीतलस्पर्शनमात्रभिन्नमृद्धं हि राज्यं पदमैन्द्रमाहुः ॥५०॥

अन्वय—तत् कल्याणपरम्पराणाम् भोक्तारम् ऊर्जस्वलम् आत्मदेहम् रक्ष। हि ऋद्धम् राज्यम् महीतलस्पर्शमात्रभिन्नम् ऐन्द्रम् पदम् आहुः ॥६०॥

संस्कृत टीका—तत्=तस्मात् कारणात् कल्याणपरम्पराणाम्=मंगलमयभोगसमूहानाम्, भोक्तारम्=अनुभवितारम्, ऊर्जस्वलम्=बलवत्, आत्मदेहम् = स्वकीयं शरीरम्, रक्ष = त्रायस्व। हि = यतः, ऋद्धम्=

राज्यम्=राजभावम्। महीतलस्पर्शनमात्रभिन्नम्=भूतलस्य सम्बन्धमात्रेण भेदयुक्तम्, ऐन्द्रम्=इन्द्रसम्बन्धिनम्। पदम्=स्थानम्, आहुः=कथयन्ति ॥५०॥

संस्कृत भावार्थ—तस्मात् कारणात् हे राजन्! अनेकमंगलमयपरम्पराणां भोक्तारम् स्वकीयं शरीर त्रायस्व। यतः श्रेष्ठपुरुषाः समृद्धं राज्यम् इन्द्रस्य पद कथयन्ति। द्वयोःइदमेवान्तरं यत् भूतलराज्यम् पृथिव्यां भवति। ऐन्द्रं पद च स्वर्गे भवति ॥५०॥

शब्दार्थ–कल्याणपरम्पराणाम्=कल्याणमय परम्पराओं के। भोक्तारम्=भोग करने वाले। उर्जस्वलम्=बलयुक्त। आत्मदेहम्=अपने शरीर की। रक्ष=रक्षा करो। ऋद्धम्=समृद्धशाली। महीतलस्पर्शनमात्रभिन्नम्=पृथ्वातल के सम्बन्ध मात्र से भिन्न। ऐन्द्रम्=इन्द्र सम्बन्धी। पदम्=स्थान। आहुः=कहते हैं ॥५०॥

हिन्दी—इसलिये हे राजन्? कल्याणों की परिपाटियों का उपभोग करने वाले तथा बलशाली अपने शरीर की रक्षा करो। क्योंकि समृद्ध राज्य को विद्वानों ने भूतल से सम्बन्ध होने के कारण पृथक् हुआ इन्द्र का पद कहते हैं ॥५०॥

विशेष—इस कारण हे राजन्! पहले तुम्हें अपने शरीर की रक्षा करनी चाहिये। क्योंकि इस गाय के बदले तुम अपने शरीर को देकर स्वर्ग चाहते हो किन्तु तुम्हारा राज्य इन्द्रलोक से कम नहीं है। तुम्हारे राज्य और इन्द्रलोक में यही अन्तर है कि आपका राज्य पृथ्वीतल संस्पर्शी है जब कि इन्द्रलोक पृथ्वी के स्पर्श से रहित है। अतः स्वर्ग के समान राज्य के सुख को भोगो। प्रस्तुत श्लोक में अर्थान्तरन्यास अलंकार है ॥५०॥

समास—कल्याणपराम्पराणाम्=कल्याणानाम् परास्परा: तासाम् (षष्ठी तत्पुरुष)। आत्मदेहम्=आत्मनः देहम् (षष्ठी तत्पुरुष स०)। महीतलस्पर्शमात्रभिन्नम्=महीतलस्य स्पर्शनम् (षष्ठी तत्पुरुष) तदेव महीतलस्पर्शनमात्रम्, तेन भिन्नम्=(तत्पुरुष) ॥५०॥

व्याकरण—रक्ष=रक्ष+लोट् म० पु० ए० व०। भोक्तारम्=भुज्+तृच्। उर्जस्वलम्=ऊर्जस्+वलच्। ऐन्द्रम्=इन्द्र+अण् ॥५०॥

प्रसंग—इसके बाद सिंह के चुप हो जाने के पर उसी बात का समर्थन मानो पर्वत ने भी किया इसका वर्णन करते हुये कहते है—

एतावदुक्त्वा विरते मृगेन्द्रे प्रतिस्वनेनास्य गुहागतेन।
शिलोच्चयोऽपि क्षितिपालमुच्चैः प्रीत्या तमेवार्थमभाषतेव ॥५१॥

अन्वय—एतावद् उक्त्वा मृगेन्द्रे विरते अस्य गुहागतेन प्रतिस्वनेन शिलोच्चयः अपि क्षितिपालम् प्रीत्या तम् एव अर्थम् उच्चैः अभाषत इव ॥५१॥

संस्कृत टीका—मृगेन्द्रे=सिंहे, एतावत्=एतन्मात्रम्, उक्त्वा=कथयित्वा, विरते सति=उपरते सति, गुहागतेन=कन्दरायां सम्प्राप्तेन, अस्य=सिंहस्य, प्रतिस्वनेन=ध्वनिना। शिलोच्चयः=पर्वतः अपि, प्रीत्या=स्नेहेन, तमेव-अर्थम्=पूर्व कथितमेव भावम्, शितिपालम्=राजानम्, उच्चैः=उच्चस्वरेण, अभाषत=अकथयत्, इव=यथा ॥५१॥

संस्कृत भावार्थ—एवं कथयित्वा सिंहे विरते सति गुहागतेन प्रतिध्वनिना पर्वतोऽपि मन्ये प्रेम्णा सिंहस्य तमेव वचनं समर्थयतिस्म ॥५१॥

शब्दार्थ—मृगेन्द्रे=शेर के,। एतावद्=इतना। उक्त्वा=कहकर। विरते=चुप हो जाने पर। गुहागतेन=कन्दरा मे व्याप्त। प्रतिस्वनेन=प्रतिध्वनि से। शिलोच्चयः अपि=पर्वत भी। प्रीत्या=प्रेमपूर्वक। तमेव अर्थम्=उसी बात को। क्षितिपालम्=राजा से। उच्चैः=ऊँचे स्वर से। अभाषत=कहा ॥५१॥

हिन्दी—सिंह के इतना कहकर चुप हो जाने पर कन्दरा से प्राप्त प्रतिध्वनि के द्वारा ऐसा प्रतीत हो रहा था मानो पर्वत भी प्रेम के कारण सिंह की बात का ही समर्थन कर रहा हो ॥५१॥

विशेष—सिंह के इतना कहकर चुप हो जाने पर उसका कथन पर्वत की कन्दराओं में व्याप्त होकर प्रतिध्वनित हो रहा था और ऐसा लग रहा था। मानो पर्वत भी सिंह के वचनों का समर्थन उच्च स्वर से कर रहा हो। प्रस्तुत श्लोक में उत्प्रेक्षा अलंकार है ॥५१॥

समास—मृगेन्द्रे=मृगाणाम् इन्द्रे (षष्ठी तत्पुरुष)। गुहागतेन=गुहाम् गतः तेन (द्वितीया तत्पुरुष)। शिलोच्चयः=शिलानाम् उच्चयः (षष्ठी तत्पुरुष)। क्षितिपालम्=क्षितिं पालयतीति तम् (उपपद समास) ॥५१॥

व्याकरण—एतावत्=एतद्+मतुप्। उक्त्वा=वच्+क्त्वा। विरते=

वि + रम् + क्त । प्रतिस्वनेन = प्रति + स्वन् + अप् । उच्चयः = उत् + चि + अच् । अभाषत = भाष् + लुङ् प्र० पु० ए० व० ॥५१॥

प्रसंग—सिंह के इस प्रकार कहे हुये वचनों को सुनकर राजा अत्यन्त दुःखी होकर सिंह से पुनः कहने लगा—

निशम्य देवानुचरस्य वाचं मनुष्यदेवः पुनरप्युवाच ।
धेन्वा तदध्यासितकातराक्ष्या निरीक्ष्यमाणः सुतरां दयालुः ॥५२॥

अन्वय—देवानुचरस्य वाचम् निशम्य तदध्यासितकातराक्ष्या धेन्वा निरीक्ष्यमाणः सुतराम् दयालुः मनुष्यदेवः पुनः अपि उवाच ॥५२॥

संस्कृत टीका—देवानुचरस्य = शिवसेवकस्य कुम्भोदरस्य, वाचम् = उच्चरितम्, निशम्य = श्रुत्वा, मनुष्यदेवः = राजा दिलीपः, तदध्यासितकातराक्ष्या = सिंहस्य आक्रमणेन भयाकुलनेत्रयाः, धेन्वा = नन्दिन्या, निरीक्ष्यमाणः = अवलोक्यमानः, सुतराम् = अत्यन्तम् । दयालुः = करुणायुक्तः । पुनरपि उवाच = अकथयत् ॥५१॥

संस्कृत भावार्थ—महादेवानुचरस्य सिंहस्य पूर्वोक्तप्रकारं वचनं श्रुत्वा राजा दिलीपः सिंहस्य आक्रमणेन व्याकुललोचनया नन्दिन्या यदा अवलोकितः, तदा दयालुः राजा पुनरपि सिंहं प्रत्युवाच ॥५२॥

शब्दार्थ—देवानुचरस्य = भगवान् शिव के अनुचर के । वाचः = वाणी को । निशम्य = सुनकर । मनुष्यदेवः = राजा दिलीप । तदध्यासितकातराक्ष्या = सिंह से आक्रान्त होने से कातर नेत्रों वाली । धेन्वा = गाय के द्वारा । निरीक्ष्यमाणः = देखे जाते हुये । सुतराम् = अत्यन्त । दयालुः = दयायुक्त । उवाच = बोले ॥५२॥

हिन्दी—भगवान् शंकर के सेवक शिव के वचनों को सुनकर मनुष्यों के स्वामी राजा दिलीप सिंह के द्वारा दबाये जाने के कारण अत्यन्त व्याकुल नेत्रों से देखने वाली नन्दिनी को देखकर अत्यन्त दयालु राजा ने फिर सिंह से कहा ॥५२॥

विशेष—सिंह ने राजा को कई युक्तियों से समझाया फिर भी राजा अपना विचार बदलने को तैयार नहीं था । इसके अतिरिक्त सिंह के द्वारा दबाई हुई नन्दिनी ने जब कातर नेत्रों से रक्षा की भीख मांगती हुई के समान

देखा तो उसका हृदय और भी करुणा से भर गया। प्रस्तुत श्लोक में 'तदाध्यासितकातराक्ष्या' और 'दयालुः' ये दोनों ही विशेषण सारगर्भित है क्योंकि गाय की इस दशा को देखकर राजा अपने मन्तव्य पर और दृढ़ हो जाता है। क्योंकि दया विशेष बढ़ जाती है। अतः यहाँ परिकर अलंकार है ॥५२॥

समास—देवानुचरस्य=देवस्य अनुचरः तस्य (षष्ठी तत्पुरुष)। मनुष्यदेवः =मनुष्येषु देवः (सप्तमी तत्पुरुष)। तदाध्यासितकातराक्ष्या=तस्य अध्यासितेन कातरे अक्षिणी यस्याः सा तया (बहु०) ॥५२॥

व्याकरण—निशम्य=नि+शम्+क्त्वा (ल्यप्)। अनुचर=अनु+चर्+ट। उवाच=वच्+लिट् प्र०पु०ए०व०। निरीक्ष्यमाणः=निर्+ईक्ष्+यक्+शानच्। दयालुः=दय्+आलुच् ॥५२॥

प्रसंग—सिंह के अनेक प्रकार से समझाये जाने पर भी राजा दिलीप अपने कर्तव्य से विमुख नहीं होता है, इसका वर्णन करते हुये कहते हैं—

क्षतात् किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढ़ः।
राज्येन किं तद्विपरीतवृत्तेः प्राणैरुपक्रोशमलीमसैर्वा ॥५३॥

अन्वय—क्षतात् किल त्रायते इति उदग्रः क्षत्रस्य शब्दः भुवनेषु रूढ़ः। तद्विपरीतवृत्तेः राज्येन किम् वा उपक्रोशमलीमसैः प्राणैः किम् ॥५३॥

संस्कृत टीका—क्षतात्=नाशात्, किल=निश्चयेन, त्रायते=रक्षति, इति अस्माद्धेतोः, उदग्रः=उन्नतः, क्षत्रस्य=क्षत्रियवर्णसूचकस्य शब्दः=वाचकः, भुवनेषु=लोकेषु रूढ़ः=प्रसिद्धः, तद्विपरीतवृत्तेः=क्षत्रशब्दविरुद्धव्यवहारस्य, राज्येन=शासनेन, किम्=को लाभः? वा=अथवा, उपक्रोशमलीमसैः=निन्दया मलिनैः, प्राणैः=जीवनैः, किम्=किं प्रयोजनम् ॥५३॥

संस्कृत भावार्थ—राजा कथयति—यत् देवानुचर? क्षतात् नाशात् त्रायते रक्षति इति अस्मिन् भावे क्षत्रियशब्दः संसारे प्रसिद्धः। अहमपि क्षत्रियोऽस्मि अतः ममापि कर्तव्यमस्ति नन्दिन्याः रक्षणम्। यदि कोऽपि क्षत्रियः नाशार्थिनं न त्रायते, न सः क्षत्रियः। तस्य राज्येन को लाभः? अथवा अस्यां मृतायां अहं लोकनिन्दां प्राप्स्यामि। निन्दायुक्तेन जीवनेन किं प्रयोजनमस्ति ॥५३॥

शब्दार्थ—उदग्रः=उन्नत। क्षतात्=विनाश से। त्रायते=रक्षा करता

है। भुवनेषु=लोको में। रूढ़:=प्रसिद्ध है। तद्विपरीतवृत्त:=उसके विपरीत आचरण वाले। राज्येन=राज्य से। उपक्रोशमलीमसै:=निन्दा से मलिन। प्राणै:=प्राणों से। किम्=क्या लाभ है? ॥५३॥

हिन्दी—'विनाश से जो रक्षा करता है' इस प्रकार की व्युत्पत्ति वाला 'क्षत्र' शब्द संसार में विख्यात है। उससे विपरीत चलने वाले मुझे राज्य से क्या लाभ है? अथवा निन्दा से मलिन हुये प्राणों को धारण करने से क्या लाभ? ॥५३॥

विशेष—राजा ने सिंह से कहा कि क्षत्रिय शब्द का अर्थ क्षत अर्थात् नाश से रक्षा करना है। जो दूसरों को नष्ट होने से बचाता है वही वास्तविक क्षत्रिय है। मैं भी क्षत्रिय हूँ और मेरा भी कर्तव्य है कि मैं गाय की रक्षा करूँ। यदि मैं इस गाय को अपने प्राण के लोभ में मर जाने देता हूँ, तो फिर राज्य करने से क्या लाभ? क्योंकि राज्य भी इन्हीं की रक्षा हेतु किया जाता है। जब मैं इसकी रक्षा नहीं कर सकता तो संसार में मेरी निन्दा हो जायेगी। निन्दित प्राणों को धारण कर क्या करूँगा? ॥५३॥

समास—तद्विपरीतवृत्त:=तस्य विपरीता वृत्ति: यस्य स: तस्य (बहुव्रीहि)। उपक्रोशमलीमसै:=उपक्रोशेन मलीमसै: तृतीया तत्पुरुष)। उदग्र:=उद्गतं अग्रं यस्य स: (बहुव्रीहि) ॥५३॥

व्याकरण—त्रायते=त्रै+लट् प्र० पु० ए० व०। वृत्ति: = वृत्+क्तिन् ॥५३॥

प्रसंग—राजा सिंह से नन्दिनी को असामान्य गाय बताते हुये कहता है—

> कथं नु शक्योऽनुनयो महर्षे: विश्राणनाच्चान्यपयस्विनीनाम्।
> इमामनूनां सुरभेरवेहि रुद्रौजसा तु प्रहृतं त्वयाऽस्याम् ॥५४॥

अन्वय—अन्यपयस्विनीनाम् च विश्राणनात् महर्षे: अनुनय: कथं नु शक्य:? इमाम् सुरभे: अनूनाम् अवेहि। त्वया तु अस्याम् रुद्रौजसा प्रहृतम् ॥५४॥

संस्कृत टीका—अन्यपयस्विनीनाम्=अन्यप्रशस्तदुग्धानाम्। विश्राणनात्=दानात्। महर्षे:=गुरो: वशिष्ठस्य। अनुनय:=क्रोधस्योपशम:। कथ नु=केन प्रकारेण। शक्य:=सम्भव:। इमाम्=नन्दिनीम्। सुरभे:=कामधेनो:।

अनूनाम्=अधिकाम्। अवेहि=जानीहि। त्वया=भवता। तु अस्याम्=धेन्वाम्। रुद्रौजसा=शिवस्य बलेन। प्रहृतम्=प्राहारो विहितः ॥५४॥

संस्कृत भावार्थ—राजा सिंह प्रति कथयति—हे सिंह ? त्वया प्रोक्तं यत् असंख्याः बहुक्षीराः गाः दत्वा गुरोः क्रोधापनयं कर्तुं शक्यते तन्नोपयुक्तम्, यत् त्वया आक्रान्ता इयम् धेनुः काचित् सामान्या गौः नास्ति, अपितु कामधेनु-तुल्या अस्ति। त्वया यदस्याम् आक्रमणं कृतं। तत्तु शिवप्रभावो, न तावकीनं बलम् ॥५४॥

शब्दार्थ—अन्यपयस्विनीनां=अन्य गायों के। विश्राणनात्=दान से। महर्षेः=वशिष्ठ के। अनुनयः=शान्ति, क्रोध की शान्ति। कथं नु=कैसे। शक्यः=किया जा सकता ? इमाम्=नन्दिनी को। सुरभेः=कामधेनु से। अनूनाम्=कम नहीं। अवेहि=समझो। रुद्रौजसा=रुद्रभगवान् शिव के प्रभाव से। प्रहृतम्=प्रहार किया है ॥५४॥

हिन्दी—दूसरी अधिक दुग्ध देने वाली गायों के दान से महर्षि वशिष्ठ का क्रोध कैसे शान्त किया जा सकता है ? क्यों कि इस गाय को कामधेनु से कम मत समझिए। आप ने भगवान् शिव के प्रभाव से इस पर आक्रमण किया है ॥५४॥

विशेष—राजा सिंह से कहता है—हे सिंह ! तुम इस गाय को इतना सामान्य समझकर कहते हो कि गुरु को अन्य असंख्य गाये देकर प्रसन्न कर सकते हो यह ठीक नहीं हैं। क्योंकि यह कोई सामान्य गाय नहीं है। यह कामधेनु के तुल्य है। अतः इसके बदले में करोड़ों गायें देने पर भी गुरु वशिष्ठ को कैसे प्रसन्न किया जा सकता है ? और जो तुमने इस पर आक्रमण कर दिया है वह तुम्हारा बल नहीं, अपितु शिव का प्रभाव है ॥५४॥

समास—रुद्रस्य ओजसा (षष्ठी तत्पुरुष स०)। महान् चासौ ऋषिः महर्षिः (कर्मधारय) ॥५४॥

व्याकरण—कथम्=किम्+थमु। शक्यः=शक्+यत्। अनुनयः=अनु+नी+अच्। विश्राणनात्=वि+श्रण्+णिच्+ल्युट् (अन)। पयस्विनी=पयस्+विनि+ङीप्। प्रहृतम्=प्र+हृ+क्त। अवेहि=अव+इ+लोट् म० पु० ए० व० ॥५४॥

प्रसंग—राजा सिंह से कहता है कि 'इस गाय के बदले मेरे शरीर से अपना भोजन कर लो'—

सेयं स्वदेहार्पणनिष्क्रयेण न्याय्या मया मोचयितुं भवत्तः ।
न पारणा स्याद्विहता तवैवं भवेदलुप्तश्च मुनेः क्रियार्थः ॥५५॥

अन्वय—सा इयम् मया स्वदेहार्पणनिष्क्रयेण भवत्तः मोचयितुम् न्याय्या । एवम् तव पारणा विहता न स्यात्, मुनेः क्रियार्थः च अलुप्तः भवेत् ॥५५॥

संस्कृत टीका—सा इयम्=एवंविधा गौः नन्दिनी, मया=दिलीपेन, स्वदेहार्पणनिष्क्रयेण=आत्मनः शरीरस्य प्रदानमूल्येन, भवत्तः=त्वत्तः, मोचयितुम् । न्याय्या=न्याययुक्ता । एवम्=अनेन प्रकारेण । तव=भवतः, पारणा=उपवासान्तभोजनम्, विहता=विनष्टा । न स्यात्=न भवेत्, मुनेः=वशिष्ठस्य, क्रियार्थश्च=होमादिक्रियाणां प्रयोजनम्, अलुप्तः न भवेत्=विनष्टः न स्यात् ॥५५॥

संस्कृत भावार्थ—राजादिलीपेनोक्तम्—यदेवंविधा कामधेनुतुल्या नन्दिनी मया स्वदेहदानेन रक्षणीया अस्ति । अतः भवान् मम देहं भक्षयित्वा स्वव्रतपारणां करोतु । एवं प्रकारेण भवतः अग्रागतस्य जीवस्य भक्षणात् व्रतपारणाऽपि भविष्यति । गुरोश्च होमादिकार्याणां प्रयोजनमपि न नंक्ष्यति ॥५५॥

शब्दार्थ—स्वदेहार्पणनिष्क्रयेण=अपने शरीर के प्रदान रूप मूल्य के द्वारा । भवत्तः=आप से । मोचयितुम्=छुड़ाना । न्याय्या=उचित है । पारणा=व्रत के अन्त का भोजन । विहता=नष्ट । न स्यात्=नहीं होगा । मुनेः=वशिष्ठ की । क्रियार्थः=होमादि क्रियाओं का । अलुप्तः=विनष्ट न स्यात्=नहीं होगा ॥५५॥

हिन्दी—इस प्रकार की नन्दिनी को अपने शरीर को अर्पित कर आपसे छुड़ाना न्याययुक्त है । इस प्रकार आपके व्रत का पारण भी हो जायेगा और मुनि के हवन इत्यादि कार्यों का नाश भी नहीं होगा ॥५५॥

विशेष—राजा ने सिंह से कहा कि यह नन्दिनी कामधेनु के समान है । इसलिये इसकी रक्षा करना मेरा धर्म है । अतः इसके बदले में आप मेरे शरीर का भक्षण करलो । इससे आपके नियम का पालन हो जायेगा । साथ ही मेरे

गुरु की भी हवन इत्यादि कार्यों का प्रयोजनभूत यह नन्दिनी नष्ट होने से बच जायेगी ॥५५॥

समास –स्वदेहार्पणनिष्क्रयेण=स्वस्य देहस्य अर्पणम् एव निष्क्रयः तेन (कर्मधारय)

व्याकरण—अर्पणः=ऋ+णिच्+पुक्+ल्युट् (अन)। निष्क्रय=निस्+क्री+अच्। न्याय्या=न्याय+यत्। मोचयितुम्=मुच्+णिच्+तुमुन्। भवत्तः=भवत्+तसिल्। विहता=वि+हन्+क्त+टाप् ॥५५॥

प्रसंग—इस प्रकार नन्दिनी का विनाश कर गुरु के सामने किस प्रकार उपास्थित होऊँगा? राजा इस बात का वर्णन करते हुये कहता है—

भवानपीदं परवानवैति महान् हि यत्नस्तव देवदारौ।
स्थातुं नियोक्तुर्न हि शक्यमग्रे विनाश्य रक्ष्यं स्वयमक्षतेन ॥५६॥

अन्वय—भवान् अपि परवान् इदम् अवैति हि देवदारौ तव महान् यत्नः, रक्ष्यम् विनाश्य स्वयमक्षतेन नियोक्तुः अग्रे स्थातुम् न शक्यम् ॥५६॥

संस्कृत टीका—भवान्=त्वम्, अपि=समुच्चये, परवान्=परतन्त्रः। इदम्=एतत्। अवैति=जानाति। हि=यतः। देवदारौ=देवदारुनामके वृक्षे। तव=सिंहस्य। महान्=अत्यधिकः। यत्नः=प्रयासः। रक्ष्यम्=रक्षायोग्यम्। विनाश्य=नाशयित्वा। स्वयमक्षतेन=स्वयम् क्षतरहितेन। नियोक्तुः=नियोजनस्य। अग्रे=संमुखे। स्थातुम्=अधिष्ठातुम्। न शक्यम्=न समर्थम् ॥५६॥

संस्कृत भावार्थ—राजा कथयति—यत् भवानपि शिवस्य सेवकोऽस्ति। अतः एतज्जानाति यत् सेवकः सर्वदा पराधीनवृत्तिः भवति। भवानपि पुरोदृश्यमानस्य देवदारोः वृक्षस्य रक्षणार्थं प्रयत्नं करोति। अतः अहमपि त्वमिव पराधीनवृत्तिः अस्मि। कोऽपि सेवकः स्वामिनः अग्रे रक्षणीयम् वस्तु विनाश्य कथं गन्तुं समर्थोऽस्ति। अतः मया एकः प्रयत्नः करणीयः, येन नन्दिनी रक्षिता भवेत् ॥५६॥

शब्दार्थ—भवान्=आप। परवान्=परतन्त्र। इदम्=यह बात। अवैति=जानते हैं। देवदारौ=देवदारु की पेड़ की रक्षा में। महान् प्रयत्नः=महान प्रयास है। रक्ष्यम्=रक्षा के योग्य। विनाश्य=विनाश कराकर।

स्वयमक्षतेन=स्वयं बिना घायल हुये। नियोक्तु:=नियोजक स्वामी के। अग्रे = सामने। स्थातुम्=ठहरने में। न शक्यम् = समर्थ नहीं हो सकते ॥५६॥

हिन्दी—आप भी पराधीन हैं और इस बात को भी जानते हैं कि आप देवदारु की रक्षा करने का महान् प्रयत्न करते हैं; क्योंकि रक्षा करने योग्य वस्तु का विनाश करके स्वयं बिना किसी चोट खाये स्वामी के सम्मुख सेवक कैसे खड़ा रह सकता है? ॥५६॥

विशेष—राजा ने सिंह से कहा—कि आप भी मेरी तरह परतन्त्र है। आपको भी शिवजी ने इस वृक्ष की रक्षा करने के लिये नियुक्त किया है। आप इस वृक्ष की रक्षा पूर्ण प्रयत्न से करते हैं। इस प्रकार यह निश्चित है कि सेवक को स्वामी द्वारा सम्हलाये गये रक्षणीय पदार्थ की यत्नपूर्वक रक्षा करनी चाहिये। यदि किसी कारणवश वह रक्षणीय वस्तु नष्ट हो जाती है। तो सेवक स्वामी के सम्मुख कैसे जा सकता है? जब कि रक्षक के कोई चोट भी नहीं आई है। अतः मैं स्वयम् नष्ट हुये बिना इस नन्दिनी को नष्ट नहीं होने दूँगा ॥५६॥

व्याकरण—परवान्=पर+मतुप्। अवैति=अव+इ+लट् प्र० पु० ए० व०। यत्न:=यत्+नङ्। स्थातुम्=स्था+तुमुन्। नियोक्तु:=नि+युज्+तृच्। शक्यम्=शक+यत्। रक्ष्यम्=रक्ष+यत्। विनाश्य=वि+नश्+णिच्+क्त्वा (ल्यप्) ॥५६॥

प्रसंग—इस भौतिक शरीर की अपेक्षा यश रूपी शरीर श्रेष्ठ है। इस बात का वर्णन करते हुये राजा कहता है—

> **किमप्यहिंस्यस्तव चेन्मतोऽहं यशःशरीरे भव मे दयालुः।**
> **एकान्तविध्वंसिषु मद्विधानां पिण्डेष्वनास्था खलु भौतिकेषु ॥५७॥**

अन्वय—किमपि अहम् तव अहिंस्यः मतः चेत् मे यशःशरीरे दयालुः भव। एकान्तविध्वंसिषु भौतिकेषु पिण्डेषु मद्विधानाम् अनास्था खलु ॥५७॥

संस्कृत टीका—किमपि=किं वा यदि, अहम्=दिलीपः, तव=भवतः, अहिंस्यः=अवध्यः, मतः=सम्मतः, चेत्=तर्हि, मे=मम, यशःशरीरे=कीर्तिकलेवरे, दयालुः=कृपालुः, भव=भवेः, एकान्तविध्वंसिषु=अनिवार्य-

रूपेण विनाशशीलेषु, भौतिकेषु=पृथिव्यादि महाभूतविकारेषु, पिण्डेषु=शरीरेषु, मद्विधानाम् = मादृशानाम्, अनास्था = अविश्वासः, खलु = निश्चयेन ॥५७॥

संस्कृत भावार्थ—राजा कथयति—यत् हे शिवगण ? केनापि कारणेन तव विचारे अहम् अवध्योऽस्मि, तर्हि मम यशःशरीरस्य रक्षां कुरु। यतश्च केनापि प्रकारेण पृथिव्यादिपञ्चभूतविनिर्मितम् इदं शरीरं अवश्यमेव नष्टं भविष्यति, किन्तु चिरस्थायि भवति। अतः क्षणविध्वंसिषु भौतिकशरीरेषु मम कापि आस्था न विद्या ॥५७॥

शब्दार्थ—किमपि=किसी कारण। अहम्=मैं। अहिंस्यः=अवध्य। मे=मेरे। यशःशरीरे=यश रूपी शरीर पर। दयालुः भव=दया कीजिये। मद्विधानाम्=मेरे समान व्यक्तियों की। एकान्तविध्वंसिषु=निश्चित नश्वर। भौतिकेषु=पांच भूतों से निर्मित। पिण्डेषु=शरीर के प्रति। अनास्था=अविश्वास ॥५७।

हिन्दी—यदि किसी कारणवश मैं आपके द्वारा अवध्य हूँ तो मेरे यशरूपी शरीर पर दया करो। क्योंकि मेरे जैसे लोगों की अवश्य नष्ट होने वाले पृथिव्यादि पाँच महाभूतों से बने शरीर में आस्था नहीं होती है ॥५७॥

विशेष—राजा ने कहा—हे सिंह ! किसी कारणवश आप मुझे मारना उचित नहीं समझते हैं तो मेरे कीर्तिरूपी शरीर पर दया कीजिये। क्योंकि मैं यह भलीभाँति जानता हूँ कि यह पाँच महाभूतों से बना यह शरीर एक दिन अवश्य नष्ट होगा और मैं इस शरीर से श्रेष्ठ कीर्ति को मानता हूँ। इस नन्दिनी के कष्ट होने पर मेरा यश रूपी शरीर नष्ट हो जायेगा। अतः आप मेरे इस भौतिक शरीर के रक्षा को छोड़कर कीर्ति रूपी शरीर के प्रति रक्षा के प्रति दयाभाव दिखाइये ॥५७॥

समास—अहिंस्यः=न हिंस्यः (नञ् तत्पुरुष)। एकान्तविध्वंसिषु=एकान्तः विध्वंसः येषां ते तेषु (बहुव्रीहि) ॥५७॥

व्याकरण–अहिंस्यः=न+हिंस्+यत्। दयालुः=दय्+आलुच्। भौतिक=भूत+ठक् ॥५७॥

प्रसंग—अब राजा दिलीप सिंह से अपनी प्रार्थना को स्वीकार करने के लिये समर्थन करते हुए कहते हैं—

सम्बन्धमाभाषणपूर्वमाहुः वृत्तः स नौ संगतयोर्वनान्ते ।
तद् भूतनाथानुग नार्हसि त्वां सम्बन्धिनो मे प्रणयं विहन्तुम् ॥५८॥

अन्वय—सम्बन्धम् आभाषणपूर्वम् आहुः, सः वनान्ते संगतयोः नौ वृत्तः । तत् भूतनाथानुग ! त्वम् सम्बन्धिनः मे प्रणयम् विहन्तुम् न अर्हसि । ५८॥

संस्कृत टीका—सम्बन्धम्,=सख्यम्, अभाषणपूर्वम्=पारस्परिकवार्तालापपूर्वम्, आहुः=कथयन्ति, सः=सख्यसम्बन्धः, वनान्ते=वनप्रदेशे, संगतयोः=मिलितयोः, नौ=आवयोः, वृत्तः=सजातः, तद्=तस्मात्कारणात्, भूतनाथानुग !=शिव सेवक !, त्वम्=भवान्, सम्बन्धिनः=सख्युः, मे=मम, प्रणयम् = स्नेहम्, विहन्तुम् = नाशयितुम्, न अर्हसि = न योग्योऽसि ॥५८॥

संस्कृत-भावार्थः—राजा कथयति—हे सिंह ! एवं मित्रता परस्परवार्तालापेन वनप्रदेशेऽस्मिन् आवयोः वार्तालापो जातः । अतः आवाम् परस्परं मित्रभावं संप्राप्तौ । अतः हे शिवानुचर ? अहं आशासे यद् भवान् मित्रतासम्बन्धं विनाशयितुं मे प्रार्थनां विहन्तुं च नार्हसि । अतः स्वमित्रस्य मम प्रार्थनां स्वीकुरु ॥५८॥

शब्दार्थ—सम्बन्धम्=मित्रता । आभाषणपूर्वम्=वार्तालाप के द्वारा वनान्ते=जंगल में । संगतयोः=मिले हुये । नौ=हम दोनों का । वृत्तः=हो गया । भूतनाथानुग !=भगवान् शिव के गण ? सम्बन्धिनः मे=मुझ मित्र की । प्रणयम्=प्रार्थना । विहन्तुम्=विनष्ट करने के लिये, अस्वीकार करने के लिये । नार्हसि=नहीं हो ॥५८॥

हिन्दी—मित्रता परस्पर बातचीत करने से होती है ऐसा लोक में प्रसिद्ध है । वनप्रदेश में हम दोनों के मिलने से वह मित्रता हो चुकी है । इसलिये हे शिव के अनुचर ! आपको मुझ मित्र की प्रार्थना का नष्ट नहीं करनी चाहिये ॥५८॥

विशेष—राजा सिंह से कहता है—हम और आप दोनों मित्र हैं। क्योंकि कहा जाता है कि पारस्परिक वार्तालाप से मित्रता हो जाती है । इस वन में हम तुम दोनों का वार्तालाप करते बहुत समय व्यतीत हो गया है । अतः मित्र होने के कारण तुम्हें मेरी प्रार्थना अवश्य स्वीकार कर लेनी चाहिये । इस कारण इस गौ को छोड़ दीजिए । बदले में मुझे खा लीजिए ॥५८॥

समास—आभाषणपूर्वम्=आभाषणं पूर्वम् यस्य सः तम् (बहुव्रीहि)। भूतनाथानुग !=भूतानां नाथः तस्य अनुगः तत्सम्बुद्धौ हे भूतनाथानुग ? (तत्पुरुष) ॥५८॥

व्याकरण—आभषण=आ+भाष्+ल्युट् (अन)। वृत्तः=वृत्+क्त। संगतः=सम्+गम्+क्त। अनुगः=अनु+गम्+ड। प्रणयम्=प्र+णी+अच्। विहन्तुम्=वि+हन्+तुमुन् ॥५८॥

प्रसंग—इस प्रकार प्रार्थना स्वीकार कर लेने पर राजा दिलीप ने अपने शरीर को सिंह के सामने समर्पित कर दिया इसका वर्णन करते हुये महाकवि कहते हैं—

तथेति गामुक्तवते दिलीपे सद्यः प्रतिष्टम्भविमुक्तबाहुः।
स न्यस्तशस्त्रो हरये स्वदेहम् उपानयद् पिण्डमिवामिषस्य ॥५९॥

अन्वय—तथा इति गाम् उक्तवते हरये सद्यः प्रतिष्टम्भविमुक्तबाहुः न्यस्तशस्त्रः स दिलीपः स्वदेहम् आमिषस्य पिण्डम् इव उपानयत् ॥५९॥

संस्कृत टीका—तथा=एवमस्तु, इति=अनेन प्रकारेण, गाम्=वाणीम्, उक्तवते=कथितवते, हरये=सिंहाय, सद्यः=झटिति, प्रतिष्टम्भविमुक्तबाहुः=बन्धनात् विमुक्तभुजः, न्यस्तशस्त्रः=त्यक्तायुधः, सः=राजा दिलीपः, स्वदेहम्=आत्मनः शरीरम्, आमिषस्य=मांसस्य, पिण्डम्=कवलम्, इव=यथा, उपानयत्=अर्पितवान् ॥५९॥

संस्कृत भावार्थ—राज्ञः अनुनयानन्तरं सिंहनोक्तम्—एवमस्तु सिंहस्य कथनानन्तरमेव राज्ञः बाह्वोः बन्धनात् विमुक्तोऽभवत्। राजा क्षत्रियोचित-सहायकानि आयुधानि त्यक्त्वा स्वशरीरं मांसस्य पिण्डमिव सिंहाय समर्पित-वान् ॥५९॥

शब्दार्थ—तथेति=एवम् इस प्रकार। गाम्=वाणी के। उक्तवते=कहने पर। हरये=शेर के लिये। सद्यः=तुरन्त। प्रतिष्टम्भविबृद्धबाहुः=बन्धन से मुक्त भुजा वाले। न्यस्तशस्त्रः=शस्त्र छोड़कर। स्वदेहम्=अपने शरीर को। आमिषस्य=मांस के। पिण्डमिव=पिण्ड के समान। उपानयत्=अर्पित कर दिया ॥५९॥

हिन्दी—"ऐसा ही हो" इस प्रकार कहने वाले सिंह के लिये तत्काल

बन्धन छूटी हुई भुजा वाले तथा आयुधों को त्याग करने वाले राजा दिलीप ने अपने शरीर को मांस के पिण्ड के समान समर्पित कर दिया ॥५९॥

विशेष—दिलीप की प्रार्थना को सुनकर 'ऐसा ही हो' सिंह के ऐसा कहने पर राजा की भुजा छूट गई। राजा ने आयुधों को एक ओर रखकर अपने शरीर को सिंह के सामने मांस के पिण्ड के समान समर्पित कर दिया। प्रस्तुत श्लोक में नन्दिनी द्वारा राजा की परीक्षा की अन्तिम सीमा और राजा का उसमें सफल होना अभिव्यक्त किया गया है ॥५९।

समास—प्रतिष्टम्भविमुक्तबाहुः=प्रतिष्टम्भात् विमुक्तः बाहुः यस्य सः (बहुव्राहि)। न्यस्तशास्त्रः=न्यस्तानि शस्त्राणि येन सः(बहुव्रीहि)। स्वदेहम्=स्वस्य देहम् (षष्ठी तत्पुरुष) ॥५९॥

व्याकरण—तथा=तद्+थाल्। उक्तवते=वच्+क्तवतु (च० ए० व०) विमुक्त=वि+मुच्+क्त। न्यस्त=नि+अस्+क्त। शस्त्र=शस्+ष्ट्रन्। उपानयत्=उप+नी+लङ् अ० पु० ए० व० ॥५९॥

प्रसंग—इसके बाद राजा के परीक्षा में सफल होने तथा विद्याधरों द्वारा राजा के ऊपर पुष्पवृष्टि किया जाने का वर्णन करते हुये महाकवि कहते हैं—

तस्मिन् क्षणे पालयितुः प्रजानामुत्पश्यतः सिंहनिपातमुग्रम्।
अवाङ्मुखस्योपरि पुष्पवृष्टिः पपात विद्याधरहस्तमुक्ता ॥६०॥

अन्वय–तस्मिन् क्षणे अवाङ्मुखस्य उग्रम् सिंहनिपातम् उत्पश्यतः प्रजानाम् पालयितुः उपरि विद्याधरहस्तमुक्ता पुष्पवृष्टिः पपात ॥६०।

संस्कृत टीका—तस्मिन्क्षणे=तस्मिन्नवसरे, अवाङ्मुखस्य=अधोमुखस्य, उग्रम्=घोरम्, सिंहनिपातम्=केसरिणः आक्रमणम्, उत्पश्यतः=प्रतीक्षमाणस्य प्रजानाम्=जनानाम्, पालयितुः=रक्षकस्य। उपरि=उपरिष्टात्, विद्याधर-हस्तमुक्ता=देवयोनिविशेषाणां करैः मुक्ता, पुष्पवृष्टिः=कुसुमानां वर्षा। पपात=अपतत् ॥६०॥

संस्कृत भावार्थ—यदा राजा अस्त्रं परित्यज्य आत्मनः शरीरं मांसपिण्डवत् निहाय समर्प्य तस्याक्रमणं प्रतीक्षमाणः आसीत्, तदा तत्काल एव राज्ञः उपरि विद्याधराणाम् हस्तैः मुक्ता पुष्पवृष्टिः अभवत् ॥६०॥

शब्दार्थ—तस्मिन् क्षणे=उस समय। उग्रम्=भयानक। सिंहनिपातम्=

सिंह के आक्रमण की। उत्पश्यतः=प्रतीक्षा करते हुये। प्रजानां पालयितुः=प्रजा के पालक दिलीप के। अवाङ्मुखस्य=नीचे मुख किये हुये। उपरि=ऊपर। विद्याधरहस्तमुक्ता=विद्याधरों के हाथों से की गई। पुष्पवृष्टिः=फूल की वर्षा। पपात=हुई ॥६०॥

हिन्दी—उस समय सिर को नीचे झुकाये हुये तथा सिंह के भयानक आक्रमण की प्रतीक्षा करने वाले प्रजापालक राजा दिलीप के ऊपर विद्याधरों के हाथों से छोड़े गये पुष्पों की वर्षा हुई ॥६०॥

विशेष—राजा दिलीप शस्त्रों का त्यागकर सिंह के भक्षणार्थ नीचे को सिर करके बैठ गये। बैठे हुये थे सिंह के आक्रमण की प्रतीक्षा कर ही रहे थे कि सिंह के आक्रमण के स्थान पर उनके ऊपर फूल की वर्षा होने लगी ॥६०॥

समास—सिंहनिपातम्=सिंहस्य निपातम् (षष्ठी तत्पुरुष)। विद्याधर-हस्तमुक्ता=विद्याधराणां हस्तेभ्यः विमुक्ता (तत्पुरुष)। पुष्पवृष्टिः=पुष्पाणां वृष्टिः (षष्ठी तत्पुरुष) ॥६०॥

व्याकरण—पालयितुः=पाल्+णिच्+तृच्। प्रजा=प्र+जन्+ड+टाप्। उत्पश्यतः—उत्+दृश्+शतृ। निपात=नि+पत्+घञ्। वृष्टिः=वृष्+क्तिन्। पपात=पत्+लिट्+प्र० पु० ए० व० ॥६०॥

प्रसंग—राजा की परीक्षा पूर्ण हो जाने पर नन्दिनी प्रसन्न होकर 'हे वत्स उठो' इस प्रकार कहते हुये बोली—

उत्तिष्ठ वत्सेत्यमृतायमानं वचो निशम्योत्थितमुत्थितः सन्।
ददर्श राजा जननीमिव स्वां गामग्रतः प्रस्रविणीं न सिंहम् ॥६१॥

अन्वय—राजा "वत्स उत्तिष्ठ" इति अमृतायमानम् उत्थितम् वचः निशम्य उत्थितः सन् अग्रतः प्रस्रविणीम् गाम् स्वाम् जननीम् इव ददर्श, सिंहम् न (ददर्श) ॥६१॥

संस्कृत टीका—राजा=दिलीपः, वत्स ? उतिष्ठ=हे पुत्र ? उत्तिष्ठ। इति=एवम्, अमृतायमानम्=अमृततुल्यम्, उत्थितम्=प्रकटीभूतम्। वचः=वचनम्, निशम्य=श्रुत्वा, उत्थितः सन्=ऊर्ध्वस्थितः सन्, अग्रतः=सम्मुखे, प्रस्रविणीम्=दुग्धस्रविणीम्, गाम्=नन्दिनीम्, स्वाम्=आत्मीयाम्, जननीम्

=मातरम्, इव=यथा, ददर्श=विलोकितवान्, सिंहम्=केसारिणम्, न=नहिं (ददर्श) ॥६१॥

संस्कृत भावार्थ—राजा दिलीपः अमृतसदृशं वचनमाकर्ण्य 'हे वत्स उत्तिष्ठ ?' इति अमृतसदृशं मधुरं वचनं निशम्य उत्थितः सन् अग्रे दुग्धप्रस्रविणीम् नन्दिनीम् स्वकीयाम् जननीम् इव ददर्श, सिंहं तु न ददर्श ॥६१॥

शब्दार्थ—अमृतायमानम्=अमृत के समान। उत्थितम्=उत्पन्न। वचः=वचन को। निशम्य=सुनकर। उत्थितः सन्=उठे हुये। अग्रतः=सामने। स्वजननीमिव=अपनी माँ के समान। प्रस्रविणीम्=दुग्ध बहाती हुई। गाम्=नन्दिनी को। ददर्श=देखा ॥६१॥

हिन्दी—राजा दिलीप ने "हे वत्स उठो" इस प्रकार के अमृत के समान प्रिय वचनों को सुनकर उठते हुये आगे दूध का क्षरण करती हुई नन्दिनी को अपनी माता के समान देखा। सिंह को नहीं देखा ॥६१॥

विशेष—राजा के ऊपर सिंह का आक्रमण होने वाला था। परन्तु उसके स्थान पर पुष्प वृद्धि हुई। बाद में 'हे बालक उठो' इस प्रकार अमृत के समान प्रिय वचनों को सुनकर फिर उठते हुये उसने देखा तो सामने दूध को बहाती हुई नन्दिनी खड़ी है और सिंह नहीं दिखाई दे रहा है। गाय में जननी की सम्भावना होने से प्रस्तुत श्लोक में उत्प्रेक्षा अलंकार है ॥६१॥

प्रसंग—उसके बाद अपने सम्बन्ध में आश्चर्य चकित राजा को देखकर उसको दूर करती हुई नन्दिनी बोली—

> **तं विस्मितं धेनुरुवाच साधो। मायां मयोद्भाव्य परीक्षितोऽसि।**
> **ऋषिप्रभावान्मयि नान्तकोऽपि प्रभुः प्रहर्तुं किमुतान्यहिंस्राः ॥६२॥**

अन्वय—विस्मितम् तम् धेनुः उवाच साधो! मया मायाम् उद्भाव्य परीक्षितः असि। ऋषिप्रभावात् मयि अन्तकः अपि प्रहर्तुम् न प्रभुः, अन्यहिंस्राः किमुत ॥६२॥

संस्कृत टीका—विस्मितम्=आश्चर्यान्वितम्, तम्=राजानं दिलीपम् धेनुः=नन्दिनी, उवाच=अकथयत्, साधो! मया=नन्दिन्या मायाम्=कपटजालम्, उद्भाव्य=प्रकटीकृत्य, परीक्षितोऽसि=परीक्षां कृतवानसि, ऋषिप्रभावात् = वशिष्ठस्य सामर्थ्यात्, मयि = नन्दिन्याम्, अन्तकः =

यमराजोऽपि । प्रहर्तुम्=आक्रमितुम्, न=नहिं, प्रभुः=समर्थः, अन्यहिंस्राः=सिंहादयः, किमुत=न किमपि ॥६२॥

संस्कृत भावार्थ—आक्रमणस्य स्थाने पुष्पवृष्ट्या आश्चर्यान्वितं राजानं दिलीपं प्रत्युवाच—हे पुत्र ? मया एव कपटजालम् प्रकटीकृत्य तव परीक्षा कृता इदानीं त्वं सफलपरीक्षितः असि । वशिष्ठस्य प्रभावात् मयि यमराजोऽपि आक्रमणं कर्तुं न समर्थः । अन्येषाम् सामान्यहिंस्राणां सिंहादीनां आक्रमणस्य तु का कथा ? ॥६२॥

शब्दार्थ—विस्मितम्=आश्चर्य युक्त । तम्=राजा से । धेनुः=नन्दिनी, उवाच=बोली । हे साधो ?=हे सज्जन ? मया=मैंने, मायाम्=माया को । उद्भाव्य=उत्पन्न करके । परीक्षितोऽसि=परीक्षा ली गई है । ऋषिप्रभावात्=ऋषि वशिष्ठ के प्रभाव से । अन्तकः=यमराज भी । प्रहर्तुम्=प्रहार के लिए । नहि प्रभुः=समर्थ नहीं है । अन्यहिंस्राः=अन्य हिंसक जीव । किमुत=क्या कहना ॥६२॥

हिन्दी—आश्चर्य से चकित राजा दिलीप से नन्दिनी ने कहा कि हे—सज्जन ! माया के सिंह को दिखाकर मैंने तुम्हारी परीक्षा की है। ऋषि वशिष्ठ के प्रभाव से मुझ पर यमराज भी आक्रमण नहीं कर सकता अन्य सिंहादि जीवों का तो कहना ही क्या ? ॥६२॥

विशेष—सिंह के आक्रमण के बदले आकाश से पुष्पवृष्टि होना तथा सिंह के गुप्त हो जाने के कारण विशेष आश्चर्य चकित राजा दिलीप से नन्दिनी ने कहा—हे धर्मात्मन् ! यह सब तुम्हारी परीक्षा के लिये किया गया था । यह सब मेरी ही माया थी । ऋषि वशिष्ठ के प्रभाव के कारण मेरे ऊपर यमराज भी आक्रमण नहीं कर सकता । साधारण सिंह आदि हिंसक जीव तो मेरे ऊपर क्या आक्रमण करेंगे ? यहाँ नन्दिनी गुरु वशिष्ठ के अतिशय प्रभाव का प्रदर्शन किया है । अतः उदात्त अलंकार है । इसके अतरिक्त 'किमुतान्यहिंस्राः' इस शब्द के प्रयोग के कारण अर्थापत्ति अलंकार भी है ॥६२॥

समास—ऋषिप्रभावात्=ऋषेः प्रभावात् (षष्ठी पुरुष) । अन्यहिंस्राः=अन्ये च ते हिंस्राः (कर्मधारय) ॥६२॥

व्याकरण—विस्मितम्=वि + स्मि + क्त । उद्भाव्य=उत् + भू + णिच् + क्त्वा (ल्यप्) । परीक्षितः=परि + ईक्ष् + क्त । प्रभाव=प्र + भू +

घञ् । प्रहर्तुम्=प्र+हृ+तुमुन् । हिंस्राः=हिस्+रक् । उवाच=वच्+लिट् प्र० पु० ए० व० । असि=अस्+लट् म० पु० ए० व० ॥६२॥

प्रसंग—ऋषि का तथा अपना प्रभाव प्रदर्शित करने के पश्चात् नन्दिनी प्रसन्न होकर राजा को वर माँगने के लिए कहती है—

भक्त्या गुरौ मय्यनुकम्पया च प्रीताऽस्मि ते पुत्र ! वरं वृणीष्व ।
न केवलानां पयसां प्रसूतिमवेहि मां कामदुघां प्रसन्नाम् ॥६३॥

अन्वय—हे पुत्र ! गुरौ भक्त्या मयि अनुकम्पया च ते प्रीता अस्मि, वरं वृणीष्व । माम् केवलानाम् पयसाम् प्रसूतिम् न अवेहि । प्रसन्नाम् कामदुघाम् अवेहि ॥६३॥

संस्कृत टीका—हे पुत्र ?=हे राजन् दिलीप ? गुरौ=वशिष्ठे । भक्त्या=श्रद्धया । मयि=नन्दिन्याम् । अनुकम्पया=कृपाभावेन । च, ते=तुभ्यम् । प्रीता=प्रसन्ना । अस्मि=भवामि । वरम्=यथोप्सितं वस्तु, वृणीष्व=याचय । माम्=नन्दिनीम् । केवलानां पयसाम्=एकमात्रदुग्धानाम् । प्रसूतिम्=उत्पादयित्रीम् । न=नहि । अवेहि=जानीहि । प्रसन्नाम्=प्रीताम् माम् । कामदुघाम्=अभिलाषा पूरयित्रीम् अवेहि=जानीहि ॥६३॥

संस्कृत गद्यार्थ—परीक्षायां सफलं राजानं प्रति नन्दिनी प्रत्यवदत्—हे राजन् ! त्वया आचार्ये वशिष्ठे महती श्रद्धा प्रदर्शिता । यतः तस्य कथनादेव त्वया मम सेवा कृता । त्वया मयि एवम् अनुकम्पा कृता यत् स्वप्राणानपि त्यक्तुं उद्यतो जातः । अतः अहम् त्वयि प्रीतास्मि । सम्प्रति वरं याचय । अहं तुभ्यं सर्वाधिकं प्रियं वस्तु दास्यामि । अहम् केवलं दुग्धप्रदायिनी धेनुः नास्मि । अपितु मां सर्वार्थप्रदायिनीं कामदुघां जानीहि ॥६३॥

शब्दार्थ—भक्त्या=भक्ति से । अनुकम्पया=दया से । प्रीतास्मि=प्रसन्न हूँ । वरम्=वरदान । वृणीष्व=मांगो । पयसां प्रसूतिम्=दूध देने वाली । न अवेहि=न समझो । प्रसन्नाम्=प्रसन्न । कामदुघाम्=कामधेनु । अवेहि=जानो ॥६३॥

हिन्दी—हे पुत्र ? आचार्य वशिष्ठ में श्रद्धाभाव रखने एवम् मेरे ऊपर दयाभाव रखने वाले तुमसे मैं प्रसन्न हूँ । अतः वर मांगो । मुझको केवल दूध

देने वाली साधारण गाय मत जानो। अपितु समस्त इच्छाओं की पूर्ति करने वाली जानो। ६३॥

विशेष—दिलीप की परीक्षा लिये जाने पर जब वह सफल रहा तो नन्दिनी ने कहा—हे पुत्र! तुमने आचार्य वशिष्ठ के वचनों को मानकर जो मेरी सेवा की है। इससे प्रकट होता है कि तुम्हारी उनमें विशेष श्रद्धा है। इसके अतरिक्त मेरी रक्षा अपने प्राणों की बाजी लगाकर की है। इस कारण मैं तुम पर प्रसन्न हूँ। तुम वर मांगों। मुझे दूध देने वाली अन्य सामान्य गायों के समान मत समझो। अपितु सेवकों की समस्त कामनाओं को पूरी करने वाली हूँ। प्रस्तुत श्लोक में नन्दिनी के विशेष प्रभाव के वर्णन किये जाने के कारण उदात्त अलंकार है॥६३॥

व्याकरण—भक्त्या = भज् + क्तिन् + तृतीया। अनुकम्पया = अनु + कम्प् + अच् + टाप् (तृतीया)। प्रीता = प्रीञ् + क्त + टाप्। वरम् = वृ + अप्। प्रसूतिम् = प्र + सू + क्तिन्। कामदुघाम् = काम + दुह् + कप् + टाप्। प्रसन्नाम् = प्र + सद् + क्त + टाप्। वृणीष्व = वृ + लोट् म० पु० ए० व०। अवेहि = अव + ई + लोट् म० पु० ए० व०॥६३।

प्रसंग—नन्दिनी के वर माँगने के लिए कहे जाने पर राजा दिलीप ने सुदक्षिणा के गर्भ से पुत्र-प्राप्ति का वर मांगा। इसका वर्णन करते हुये महाकवि कहते है—

> **ततः समानीय स मानितार्थी हस्तौ स्वहस्तार्जितवीरशब्दः।**
> **वंशस्य कर्तारमनन्तकीर्तिं सुदक्षिणायां तनयं ययाचे॥६४॥**

अन्वय—ततः मानितार्थी स्वहस्तार्जितवीरशब्दः स हस्तौ समानीय सुदक्षिणायाम् वंशस्य कर्तारम् अनन्तकीर्तिम् तनयम् ययाचे॥६४॥

संस्कृत टीका—ततः = तदनन्तरम्, मानितार्थी = सन्तोषितयाचकः, स्वहस्तार्जितवीरशब्दः = आत्मनः कराभ्यामुपार्जितवीरपदवीकः, सः = राजा दिलीपः, हस्तौ = करौ। समानीय = संयोज्य, सुदक्षिणायाम् = स्वपत्न्याम्, वशंस्य = कुलस्य, कर्तारम् = प्रवर्तकम् अनन्तकीर्तिम् = अपारयशसम्, तनयम् = पुत्रम् ययाचे = प्रार्थितवान्॥६४॥

संस्कृत भावार्थ—नन्दिन्या प्रोक्तम् हे पुत्र! वरं याचय।तदा स्वकराभ्यां

उपार्जिता वीरपदवी येन सः राजा दिलीपः हस्तौ सन्धाय सुदक्षिणायां वंशस्य प्रवर्तकम् अपारयशसं पुत्रं याचितवान् ।।६४।।

शब्दार्थ—ततः=उसके बाद। मानितार्थी=याचकों का सम्मान करने वाले। स्वहस्तार्जितवीरशब्दः=अपनी भुजाओं से 'वीर' शब्द को अर्जित करने वाले। हस्तौ समानीय=दोनों हाथ जोड़कर। अनन्तकीर्तिम्=अखण्ड कीर्ति वाले। तनयम्=पुत्र को। ययाचे=मांगा ।।६४।।

हिन्दी—इसके पश्चात् याचकों का सम्मान करने वाले तथा अपनी भुजाओं के बल से पदवी को प्राप्त करने वाले राजा दिलीप ने हाथ जोड़कर सुदक्षिणा से अपने वंश को चलाने वाले और अनन्तकीर्ति वाले पुत्र को माँगा ।।६४।।

विशेष—राजा याचकों का सम्मान करता था तथा स्वयं अपने पराक्रम के कारण 'वीर' कहा जाता था। राजा से नन्दिनी ने जब वर माँगने को कहा तो उसने सुन्दर कीर्ति वाला पुत्र माँगा। प्रस्तुत श्लोक में 'मानितार्थी' विशेषण का प्रयोग इस भाव में किया गया है कि जो दूसरे याचकों का सम्मान करता है, उसका भी मान होगा। इस कारण यहाँ परिकर अलकार है ।।६४।।

समास—मानितार्थी=मानिताः अर्थिनः येन सः (बहुव्रीहि)। स्वहस्तार्जितवीरशब्दः—स्व एव हस्तेन अर्जितः वीरशब्दः येन सः (बहुव्रीहि)। अनन्तकीर्तिम्=अनन्ता कीर्तिः यस्य सः तम् (बहुव्रीहि) ।।६४।

व्याकरण—ततः=तद्+तसिल्। समानीय=सम्+आ+नी+क्त्वा (ल्यप्)। अर्जितः=अर्ज=क्त। कर्तारम्=कृ+तृच्। कीर्तिः=कृ+क्तिन्। ययाचे=याच्+लिट् प्र० पु० ए० व० ।।६४।।

प्रसंग—राजा के सुदक्षिणा के गर्भ से पुत्र-प्राप्ति का वर माँगने पर नन्दिनी राजा से 'एवमस्तु' कहकर अपना दूध पीने के लिए कहती है—

> सन्तानकामाय तथेति कामं राज्ञे प्रतिश्रुत्य पयस्विनी सा।
> दुग्ध्वा पयः पत्रपुटे मदीयं पुत्रोपभुङ्क्ष्वेति तमादिदेश ।।६५।।

अन्वय—पयस्विनी सा सन्तानकामाय राज्ञे 'तथा इति' कामम् प्रतिश्रुत्य 'हे पुत्र ! मदीयम् पयः पत्रपुटे दुग्ध्वा उपभुङ्क्ष्व' इति तम् आदिदेश ।।६५।।

संस्कृत टीका—पयस्विनी=प्रशस्त क्षीरा। सा=नन्दिनी, सन्तानकामाय=

पुत्रेच्छुकामाय। राज्ञे=दिलीपाय, तथेति='एवमेवास्तु' इति कामम्=अभिलाषितवरम्। प्रतिश्रुत्य=प्रतिज्ञाय। हे पुत्र ?=हे वत्स, मदीयम्=मामकं पयः=दुग्धम्, पत्रपुटे=पत्रनिर्मितेसंपुटे, दुग्ध्वा=दोहनं कृत्वा। उपभुंक्ष्व=पिब, इति=एवम् तम्=राजानं दिलीपम्, आदिदेश=आज्ञां दत्तवती ॥६५॥

संस्कृत भावार्थ—यदा: दिलीप: वंशप्रवर्तकम् कीतियुक्तं पुत्रं याचितवान् तदा नन्दिनी पुत्र-प्राप्तिवरं दत्तवती तथा दिलीपम् आदिष्टवती च, यत् हे पुत्र! पत्रसम्पुटे मदीयं दुग्धं दुग्ध्वा पिब। तव मनोकामना पूर्णा भविष्यति ॥६५॥

शब्दार्थ—पयस्विनी=दूध देने वाली। सा=वह नन्दिनी। सन्तानकामाय=सन्तान की कामना वाले। प्रतिश्रुत्य=वचन देकर। मदीयं पयः=मेरे दूध को पत्रपुटे=दोने में। दुग्ध्वा=दुहकर। उपभुङ्क्ष्व=पीं लो। इति=इस प्रकार। तम्=राजा का। आदिदेश=आदेश दिया ॥६५॥

हिन्दी—सन्तान की इच्छा करने वाले राजा दिलीप से नन्दिनी ने 'ऐसा ही होगा' इस प्रकार का वर देकर (कहा)—हे पुत्र ? पत्ते का दोना बनाकर उसमें मेरा दूध दुहकर पी लो ॥६५॥

समास—सन्तानकामाय=सन्तानं कामयते इति तस्मै (उपपद समास)। पत्रपुटे=पत्राणां पुटे (षष्ठी तत्पुरुष)।

व्याकरण—प्रतिश्रुत्य=प्रति+श्रु+क्त्वा (ल्यप्)। पयस्विनी=पयस्+विनि+ङीप्। दुग्ध्वा=दुह्+क्त्वा, मदीयम्=अस्मद्+छ (ईय)। उपभुङ्क्ष्व+उप+भुज्+लोट् प्र० पु० ए० व०। आदिदेश=आ+दिश्+लिट् प्र० पु० ए० व० ॥६५॥

प्रसंग—इस प्रकार नन्दिनी के दूध पीने का आदेश देने पर राजा गुरु की आज्ञा से होम से बचे हुए दूध पीने के लिए कहता है—

> वत्सस्य होमार्थविधेश्च शेषमृषेरनुज्ञामधिगम्य मातः।
> औधस्यमिच्छामि तवोपभोक्तुं षष्ठांशमुर्व्या इव रक्षितायाः ॥६६॥

अन्वय—हे मातः! वत्सस्य होमार्थविधेः, च शेषम् तव औधस्यम् रक्षितायाः उर्व्याः षष्ठांशम् इव ऋषेः अनुज्ञाम् अधिगम्य, उपभोक्तुम् इच्छामि ॥६६॥

संस्कृत टीका—हे मातः ?=हे जननि!, वत्सस्य=तव अर्भकस्य,

होमार्थविधेश्च=हवनप्रयोजनक्रियायाः, शेषम्=अवशिष्टम्, तव=भवत्याः नन्दिन्याः, औधस्यम्=ऊधसिजातं पयः, रक्षितायाः=पालितायाः, उर्व्याः= पृथिव्याः, षष्ठांशम्=षष्ठभागम्, इव=यथा, ऋषेः=आचार्यवशिष्ठस्य, अनुज्ञाम्=अनुमितिम्, अधिगम्य=प्राप्य, उपभोक्तुम्=उपभोग कर्तुम्, इच्छामि=अभिलषामि ॥६६॥

संस्कृत भावार्थ—नन्दिनी प्रत्युवाच—त्वं सम्प्रति पत्र-पुटे दुग्ध्वा मम दुग्धं पिब। तदा राजा दिलीपः अकथयत्—हे मातः! अहं वत्सस्य दुग्धपानानन्तरं तथा गुरोः होमानुष्ठनेन अवशिष्टं दुग्ध गुरोः वशिष्ठस्य आज्ञया तथैव पातुमिच्छामि यथा स्व-भुजाभ्यां रक्षितायाः पृथिव्याः षष्ठांशम् उपभोगम् करोमि ॥६६॥

शब्दार्थ—वत्सस्य=बछड़े के। होमार्थविधेः=होमार्थानुष्ठान से। शेषम्= बचे हुए। ऊधस्यम्=दूध। रक्षितायाः=रक्षित। ऊर्व्याः= पृथ्वी के। षष्ठांशम् इव=छठे भाग के समान। ऋषेः=मुनि की। अनुज्ञाम्=आज्ञा। अधिगम्य=प्राप्तकर। उपभोक्तुम्=उपभोग करने के लिए। इच्छामि= इच्छा करता हैं ॥६६॥

हिन्दी—हे माँ! आप के बछड़े के पीने के बाद बचे हुए तथा ऋषि के हवन आदि अनुष्ठान से पूर्ण होने पर बचे हुए तुम्हारे ऊधस् से निकलने वाले दुग्ध को ऋषि वशिष्ठ की आज्ञा से पालन की गयी पृथ्वी के छठे भाग के समान पीना चाहता हूँ ॥६६॥

विशेष—नन्दिनी के द्वारा दोनों में दुहकर दूध पिये जाने का आदेश दिये जाने पर राजा ने कहा—हे मातः! पहले चिरकाल से प्रतीक्षा करने वाला आपका बछड़ा दूध पिये। तत्पश्चात् गुरु वशिष्ठ की हवनादि क्रियायें पूर्ण की जावें, उसके बाद बचे हुए दूध को भी मैं तब पी सकता हूँ जब गुरु आज्ञा देंगे। वह भी केवल अपनी भुजाओं से रक्षित पृथ्वी के षष्ठ भाग के बराबर ग्रहण करना चाहता हूँ।

प्रस्तुत श्लोक में उपमा अलंकार है। यहाँ गौ और पृथ्वी में उपमेय-उपमान भाव है। अवशिष्ट भाग का ग्रहण करना साधारण धर्म तथा इव उपमा का वाचक शब्द है ॥६६॥

समास—होमार्थविधेः=होमः एव अर्थः तस्य विधिः तस्य (तत्पुरुष)। षष्ठांशम्=षष्ठं अंशम् (कर्मधारय) ॥६६॥

व्याकरण—शेषम्=शिष्+घञ्। अधिगम्य=अधि+गम्+क्त्वा (ल्यप्)। औधस्यम्=उधस्+ण्यत्। उपभोक्तुम्=उप+भुज्+तुमुन्। इच्छामि=इष्+लट् उ० पु० ए० व० ॥६६॥

प्रसंग—राजा की इस प्रार्थना पर प्रसन्न होकर नन्दिनी वशिष्ठ के आश्रम को प्रस्थान करती है इसका वर्णन करते हुए महाकवि कहते हैं—

> इत्थं क्षितीशेन वसिष्ठधेनुर्विज्ञापिता प्रीततरा बभूव।
> तदन्विता हैमवताच्च कुक्षेः प्रत्याययावाश्रममश्रमेण॥६७॥

अन्वय—इत्थम् क्षितीशेन विज्ञापिता वशिष्ठधेनुः प्रीततरा बभूव। तदन्विता च हैमवतात् कुक्षेः अश्रमेण आश्रमम् प्रत्याययौ ॥६७॥

संस्कृत टीका—इत्थम्=अनेन प्रकारेण, क्षितीशेन=राज्ञा दिलीपेन, विज्ञापिता=आवेदिता, वशिष्ठधेनुः=गुरोः गौः नन्दिनी, प्रीततरा=अतिशयेन प्रसन्ना, बभूव=अभवत्, तदन्विता च=राजा दिलीपेन युक्ता च, हैमवतात्=हिमालयपर्वतसम्बन्धिनः। कुक्षेः=गह्वरात्, अश्रमेण=बिना परिश्रमेण, आश्रमम्=वशिष्ठस्य तपोस्थानम्, प्रत्याययौ=समागतो ॥५६॥

संस्कृत भावार्थ—राजादिलीपेनोक्तम्-अहं वत्सस्य दुग्धपानानन्तरं तथा गुरो हवनादिक्रियायाः पूर्णे जाते च दुग्धं पातुमिच्छामि। एवं कथिते सति नन्दिनी अतिशयेन प्रसन्ना अभवत्। तथा दिलीपेन सह पर्वतराजहिमालयस्य गह्वरात् निर्गत्य अश्रमेणैव वाशिष्ठस्याश्रमम् अगात् ॥६७॥

शब्दार्थ—इत्थम्=इस प्रकार,। क्षितीशेन=राजा के द्वारा। विज्ञापिता =निवेदन किये जाने पर। वशिष्ठधेनुः=नन्दिनी। प्रीततरा=अत्यन्त प्रसन्न। बभूव=हुई। तदन्विता=दिलीप से युक्त। हैमवतात्=हिमालय की। कुक्षेः =कन्दरा से। अश्रमेण=बिना श्रम से। आश्रमम्=आश्रम को। प्रत्याययौ =लौटी ॥६७॥

